यजुर्वेद-सामवेद-संस्कारभाष्यकर्त्रा वेदान्तसूत्रेषु वैदिकभाष्य-निर्मात्रा भगवद्गीतासु भगवद्भाष्यरचयित्रा काशीपण्डित-सभया "पण्डितराजे" त्युपाधिविभूषितेन स्वामि श्रीभगवदाचार्ययतिराजेन विरचितेन

बृहदारण्यकोपनिषत्संस्कारभाष्येण

संवलिता

बृहदारण्यकोपनिषद्

आचार्यपरमानन्दपदद्वन्द्वमुपास्महे । यत्कृपालेशतोपि स्यादुद्धारो नः क्षणादपि ॥ १ ॥
अरण्यं कण्टकाकीर्णं निर्भीकः प्रविशाम्यहम् । तत्र श्रीमद्गुरोः पादपङ्कजालम्बनं महत् ॥ २ ॥
व्याख्यातुमुत्सहे भव्या भव्यैरुपनिषद्गवीः । भावैः शब्दैश्च सत्कृत्याः परमार्थप्रकाशिकाः ॥ ३ ॥
मृच्छिलाखण्डयुक्तोपि गोधूम इति कथ्यते । मृच्छिलाखण्डसंयोगवियुक्तो हि स भुज्यते ॥ ४ ॥
अध्यायैरष्टभिर्युक्ता यद्यप्येषास्ति विश्रुता । तथापि मोक्षवाक्यानि व्याख्यातानीह केवलम् ॥ ५ ॥
सज्जना जनयिष्यन्ति हृदयेत्र महादरम् । दुर्जना जनयिष्यन्ति हृदये विषमुल्बणम् ॥ ६ ॥
तेषामेव विवेण स्याद्धानिस्तेन दुरव्यया । पायाच्छ्रीराम एवात्र तान्सदेत्येव कामये ॥ ७ ॥

बृहदारण्यकं शुक्लयजुर्वेदस्य शतपथब्राह्मणस्यान्तिमभागरूपम् । तच्चोपनिषद्रूपेण प्रसिद्धम् । उपनिषत्त्वं च ब्रह्मबोधोपयोगिवचनसमाहारे निरूढम् । छान्दोग्य इव बृहदारण्यकेपि न हि सर्वा एव श्रुतय उपनिषत्स्वरूपाः । याः श्रुतयः कर्मकाण्डप्रवर्तिकाः कर्मकाण्डप्रकाशिका वा न ता उपनिषच्छब्दाभिलप्याः । ब्रह्मबोधप्रवर्तिकास्वेव श्रुतिषूपनिषच्छब्दो रूढः । अतोस्माभिस्ता एवेह श्रुतयो व्याख्येया या उपनिषद्रूपाः सन्ति । पारलौकिकतत्त्वोपदेशाय यासां प्रवृत्तिस्तासामेवेह श्रुतीनां व्याख्यानम् । तत्रैवोपनिषत्त्वम् । अवशिष्टाः कर्मश्रुतयो नेह संगृहीता व्याख्याता वा । प्रयोजनाभावात् । ग्रन्थबाहुल्यभयाच्च । न निरर्थके कर्मणि प्रवृत्तिः साधीयसी । निष्प्रयोजनानां वचसां यस्य कस्यापि ग्रन्थस्य समाहारान्न बुद्धेराहारवृद्धिः । मन्यामहेस्मदनुगृहीतः पन्था अवश्यं तत्त्वविद्भिस्तत्त्वविवित्सुभिश्च विद्वद्भिरनुमोदनीय एव भविष्यति । भगवानत्र साहाय्यं विधास्यतीति सर्वथा नवीन उपनीते पथि निःशङ्कं विहरामः ।

अथ प्रथमाध्याये तृतीयं ब्राह्मणम्

असतो मा सद्गमय । तमसो मा ज्योतिर्गमय । मृत्योर्माऽमृतं गमयेति ॥ (१ । ३ । २८)

अस्याः श्रुतेर्व्याख्यानं श्रुतिः स्वयं प्रकाशयति —

स यदाहासतो मा सद्गमयेति, मृत्युर्वासत् । सदमृतम् । मृत्योर्मामृतं गमयामृतं मा कुर्वित्येवैतदाह ॥ (१ । ३ । २८)

स यदाहासतो मा सद्गमयेतीत्यस्य तात्पर्यं विवृणोति मृत्युर्वा असत् । मृत्युरेवासत् । सच्चामृतम् । एवं चासतो मा सद्गमतेत्यस्य मृत्योर्मामृतं गमयेत्यर्थः । पुनः स्पष्टयति मा मामृतममरणधर्माणं कुर्वित्येवैतदाह । ननु यदि "असतोमे" त्यनेनैव "मृत्योर्मामृतं गमये" ति गतार्थं

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

किमर्थं तर्हि मृत्योर्मामृतं गमयेति वचनमन्तिमम् ? उच्यते । मृत्योरसत्त्वममृतस्य च सत्त्वं प्रतिपादयितुमेवैतद्वचनम् । ननु मृत्योरसत्त्वप्रतिपादनेन को लाभो लिप्सित इति चेत्, उच्यते । जगदसदिति जगदेव मृत्युशब्देनेहेरितम् । यच्च सद्ब्रह्म तदेव ब्रह्मशब्देन प्रोक्तम् । अत एव प्रार्थ्यतेन्ते "अमृतं मा कुर्वि" त्यवैतदाह इत्येव एतद्वचनमाहेति ॥

तमसो मा ज्योतिर्गमयेति । मृत्युर्वै तमो ज्योतिरमृतम् । मृत्योर्मामृतं गमय । अमृतं मा कुर्वित्येवैतदाह ॥ (१ । ३ । २८)

तमसो मा ज्योतिर्गमयेत्यस्य तात्पर्यं विवृणोति मृत्युरेव तम इति अमृतमेव ज्योतिरिति । एवं च मृत्योर्मामृतं गमयेत्येवास्य वाक्यस्यापि पिण्डितार्थः ॥

मृत्योर्मामृतं गमयेति नात्र तिरोहितमिवास्ति ॥२८॥

तृतीयं वाक्यं मृत्योर्मेत्युद्दिश्योच्यते नात्र तिरोहितमिवास्ति । सर्वं स्पष्टमेव । किं स्पष्टम् ? उच्यते । अमृताधिजिगीषयैवात्रजीवानां सर्वा प्रवृत्तिः । अमृतमेवाभिलषितम् । तदेव च प्राप्यम् । मृत्युस्तु सर्वथा हेयः । मृत्युरेव जन्मानयति । न स्याद्यदि मृत्युर्नैव स्याज्जन्म । इदमपि वक्तुं शक्यत एव न स्याद्यदि जन्म न स्यान्मृत्युः । तर्हि जन्मैव तिरस्कार्यं न च मृत्युर्द्वेष्य इति । सत्यम् । वक्तुमेव शक्यमेतत् । परन्तु स एवार्थोत्रानया श्रुत्योपर्युक्तप्रकारेणाह तत्र न विजुगुप्सा कार्या ॥१। ।३। ।८॥

इति बृहदारण्यकोपनिषदि प्रथमाध्याये तृतीयं ब्राह्मणम्

प्रथमाध्याये चतुर्थं ब्राह्मणम्

आत्मैवेदमग्र आसीत्पुरुषविधः ।

अग्रे सृष्टेः प्राक्काल आत्मैवासीत् । एवकार आत्मातिरिक्तवस्तुनिषेधमाह । स चात्मा कीदृगासीदिति-प्रश्नस्योत्तरमाह पुरुषविध इति । पुरूणि बहूनि कर्मादीनी सिनाति बध्नाति संचिनोति स पुरुषः परमात्मा । यद्यपि परमात्मनः कर्मणामभावात्तत्कृतकर्मसंचयो नैव स्यादिति तथ्यं परन्तु जीवकृतकर्मणां संचयस्तस्य ज्ञाने तिष्ठत्येवात एव सर्वेषां जीवानां तत्तत्कर्मानुसृत्य फलप्रदाने स शक्तिमान् भवतीति । पुरुषस्य विधेव विधा यस्य स पुरुषविधः । अथवात्मैवेदमासीदित्येकः खण्डः । पुरुषविध आसीदिति द्वितीयः खण्डः । आत्मशब्दोत्र परमात्माभिधायकः । पुरुषशब्दोपि परमात्मवाचक एव । पुरुषस्य विधेव विधा यस्येति पुरुषविधो जीवः । यद्यात्मातिरिक्तं किमपि नासीदित्यर्थः स्वीक्रियेत तर्हि पुरुषविध इति प्रयोगो दुरुपपादो भवेत् । किंचाग्रे इत्यस्य सृष्टेः प्राक्काल इत्येवार्थः । यद्ययमर्थो न गृह्येत तर्हि अग्रशब्दोत्र निरर्थक एव स्यात् । कस्मादग्र इति प्रश्नस्य किमप्युत्तरं न स्यात् । अतः सृष्टेः प्रागित्येवार्थस्य सम्यक्त्वम् । एवं च सृष्टिसामग्र्यपि संगृहीता भवति सा चिदेव । एवं च चिदचिद्ब्रह्म चेति तत्त्वत्रयं संग्रहीतमत्र वेदितव्यम् । स्थूलजगत्सर्जनात्पूर्वं तत्त्वत्रयमासीदेव । सृष्टेः पूर्वमिति स्वीकृते केवलं सृष्टिनिषेधस्तत्काले भवति न तु सृष्टिसामग्रीनिषेधोपि । जीवानां कर्मसंग्रहोपि तदासीदित्यपि वेदितव्यम् । अन्यथा कारणाभावात्सृष्टेरनारम्भ एव स्यात् ।

सोन्वीक्ष्य नान्यदात्मनोपश्यत् (१।४।१)

स आत्मान्वीक्ष्य सम्यग्विचार्यात्मनः स्वस्मादन्यन्नापश्यत् । चिदचितोः परमात्मनोविभक्तत्वात्परमात्मानमेवापश्यदित्यर्थः । नन्वत्र स इत्यनेन किं गृह्यते जीवो वा परमात्मा वेति । यदि जीवो गृह्यते शुद्धमेतत् । तस्मादन्यः परमात्मासीदेव । यदि परमात्मा गृह्यते तदासम्भवः । ततोन्यज्जीवतत्त्वं प्रकृतितत्त्वं चासीदेव । यदि स नाजानादज्ञत्वं तस्मिन्सिध्येत् । अगत्या स इतिपदेनात्रात्मैव गृह्यते । आत्मा च ब्रह्मैव । एवं च पुरुषविध इत्यस्य नोपर्युक्तोर्थः संगतो भवेत् । न हि, नैवं कर्तव्यम् । स इति परमात्मैव । स स्वस्मादन्यन्नापश्यत् । न हि पिता पुत्रं स्वस्मादन्यत्वेन गृह्णाति । एवं च नापश्यदित्यस्य नागृह्णादित्यर्थः । न हि शरीरी शरीरं स्वस्मादन्यत्वेन जानाति ॥ १ । ४ । १ ॥

तद्धेदं तर्ह्यव्याकृतमासीत्तन्नामरूपाभ्यामेव व्याक्रियतासौनामायमिदंरूप इति । (१।४।७)

आत्मनोन्यन्नापश्यत्तत्र हेतुमाह—तर्हि तस्मिन्काले सृष्टेः पूर्वकाले तदिदमव्याकृतमस्पष्टमासीत् । तत्तस्मादिदं सर्वं जगन्नामरूपाभ्यां व्याक्रियत व्याकरोदस्येदं नामेदं च रूपं नीलपीतादिकम् । अदोनामा इदंरूप

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

इत्युभयत्र बहुव्रीहिः। अत्र किञ्चिद्विवेचनीयमस्ति। तद्धेदमित्यत्रेदंशब्देन किं गृह्यते ? जगदित्येव। जगत्पूर्वमव्याकृतमासीत्पश्चान्नामरूपाभ्यां व्याक्रियतेति। व्याकर्ता आत्मा। नामरूपे व्याकृते अयं पदार्थोसौ नामास्य पदार्थस्य चादो नामेति। इदंरूप इत्यस्य पदार्थस्य रूपमिदमिति। ततः परमुक्तम् "स एष इह प्रविष्टः" (१।४।७) स एष इत्युक्तम्। कः स एष इतिप्रश्नः। आत्मा प्रविष्ट इत्युत्तरम्। आत्मशब्देनात्र जीवो गृह्यते ब्रह्मेति वा न स्पष्टम्। यदि ब्रह्म गृह्यते तदा "यथा क्षुरः क्षुरधानेवहितः स्यात्" (१।४।७) इति श्रुतिर्वैकल्यं श्रयेत। किं ब्रह्मापि रूपवति नामवति च घटे वस्तुनि वस्त्वभ्यन्तर एव तिष्ठति न बहिः ? यदि न बहिस्तस्यावस्थानं कथं तर्हि तस्य व्यापकत्वं सिध्येत् ? तदात्मशब्दशब्दितो जीवो गृह्येत प्रवेशकर्ता। अत्रापि प्रश्नस्यावसरः। जीवः प्रविष्टो वा प्रवेशितो वा ? परमुभयत्रापि न दोषः। यदि प्रविष्टो, ब्रह्मेच्छया। यदि प्रवेशितो, ब्रह्मणेति। भवतु। स्खलितमाहात्म्यात्र श्रुतिः। क्वचिज्जीवस्तिरोधीयते क्वचिच्च ब्रह्म। नावतिष्ठते श्रुतिः कुत्रापि स्पष्टवादिनी। किंच "आ नखाग्रेभ्यः (१।४।७) इतिवचनेन जीवस्यैव प्रवेशः प्रतीयते न ब्रह्मणः। आ नखाग्रेभ्यो नखाग्राणि व्याप्य जीव एव स्थातुमर्हति न ब्रह्म। तत्तु ततोप्यतिदूरं व्याप्तं भवितुमर्हति। अन्यथा ब्रह्मत्वं व्याहन्येत। यदि "विश्वम्भरो वा विश्वम्भरकुलाये" (१।४।७) इतिवाक्यखण्डेन यथा विश्वम्भरोग्निर्विश्वम्भरकुलाये काष्ठादौ तिष्ठति तथा जीवो नामरूपाभ्यां व्याकृते वस्तुनि तिष्ठतीत्युच्यते तदा जीवस्य व्यापकत्वं शरीरपरिमाणत्वं वा सिध्येत्। सत्ववैदिकः पन्थाः।

तं न पश्यति। अकृत्स्नो हि सः॥

विश्वम्भरकुलाये विश्वम्भरमिव सर्वस्मिञ्जगति व्याप्तं तं परमात्मानं न पश्यति यो न साक्षात्करोति स हि सर्वथाकृत्स्नोपूर्णः। परमात्मानं दृष्टैव स जीवनसाफल्यमेतीति। नन्वकृत्स्नतां कृत्स्नत्वमुपगमयितुमात्मदर्शनस्यावश्यकत्वमिति तु स्थितम्। परं विश्वम्भरकुलाये व्याप्तो विश्वम्भरो न कुलायादतिरिक्तो दृश्यते। विश्वम्भरकुलाय एव विश्वम्भरतां गतः। न तदतिरिक्तस्य. तस्य किञ्चिदस्तित्वं प्रयत्नेनापि प्रतीयते। किमेवमेव जगति जीवात्मनि वा व्याप्तः पर आत्मा न स्वातन्त्र्येण क्वचिदुपलभ्यते। यदि शबलस्यैव परमात्मन उपलब्धिः परमात्मोवलब्धिरिति ख्यायते तर्हि च्छलनमेवैतत्स्यात्। प्राप्तेपि तादृशि परस्मिन्नात्मनि सहैवात्मनोनात्मनश्चापि प्राप्तेर्दुर्वारतया परमात्मप्राप्तिवचनं वञ्चनामेवाञ्चतीति। उच्यते। उदकार्थी प्राप्ते चोदके कार्तार्थ्यं भजते यद्यपि तस्मिन्नुदके रजःकणा अपि भवन्ति बहवोन्येपि च भूतभौतिकपरमाणवो भवन्ति। एवं तिष्ठतु नाम तच्छरीरभूतं चिदचिदिति वस्तुद्वयम्, अनपेक्षितं हि तत्। अनपेक्षितं पुरस्थितमपि न केनापि गृह्यते। एवं परात्मदर्शनातुरस्य पर आत्मैव लिप्सितो न तु चित्पदार्थो न वाचित्पदार्थः। सर्वविधवस्तुपूर्णे चापणे स्वाभीप्सितमेव वस्तु प्राप्य कोपि कार्तार्थ्यमाप्नुवन् गृहं निवर्तते दृष्टिक्षेपमपि न क्रियतेनाभीप्सिते वस्तुनि। एवं शरीरभूतयोर्ब्रह्मणश्चिदचितोर्नपेक्षाबुद्धिर्ब्रह्मजिज्ञासोर्ब्रह्मलिप्सोर्वा ब्रह्माधिगतस्य वेति। आम्ररसाभिलाषी केवलमाम्ररसमेवादत्ते न तत्कञ्चुकं न वा तद्बीजम्॥

स योत एकैकमुपास्ते न स वेद॥ (१।४।७)

अतः स यश्चिदचिद्ब्रह्मस्वेकैकमुपास्ते जानाति न स वेद परमात्मानमिति शेषः। उपास्तिरत्र वेदनमेव, न स वेदेतिश्रुतेः। ननु पूर्वोक्त्या सहात्र विरोधो जायते। पूर्वं शरीरभूतयोश्चिदचितोर्नैरपेक्ष्यं प्रतिपादितं ब्रह्मदर्शनावसरे,। अत्र तु चिदचितोर्वेदनं विना ब्रह्मवित्तिरेव निषिध्यते। न विरोधः। केवलचिदुपासनया केवलाचिदुपासनया ब्रह्मवित्तिप्रतिषेधस्तु सर्वसम्मत एव। परं ब्रह्मोपासनया सहैव तयोरुपासनप्रतिपादनं तु केवलमविनाभूतत्वं ब्रह्मणो लक्षयति। न ताभ्यां विना ब्रह्मप्रतिपत्तिरस्ति। शरीरभूताभ्यां ताभ्यां वैशिष्ट्यमेव ब्रह्मणो न कदाचिदपि पार्थक्यम्। अत एवोच्यते—

अकृत्स्नो ह्येषोत एकैकेन भवत्यात्मेत्येवोपासीत॥ (१।४।७)

एकैकेन केवलेन चित्तत्त्वेनाचित्तत्त्वेन वा हि एष पर आत्मा कृत्स्नो भवति। येन सह यस्य नैरन्तर्यं तद-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

न्तरेण तस्याकृत्स्नता नियतैव। आम्ररसप्रेप्सुराम्रफलं लभमानस्त्वचमपि लभते बीजमपि लभते । ताभ्यां विना तदद्रसस्य प्राप्तिर्दुष्करैव। यथाम्ररसलिप्सयाम्रफलं जिघृक्षोस्त्वग्बीजयोः प्राप्तिर्दुर्वारा तथा ब्रह्मदिदृक्षोरपि तच्छरीरभूतयोश्चिदचित्पदार्थयोः प्राप्तिर्दुर्वारा। परं ग्राह्यत्वं प्राप्यत्वं रस्यत्वं तु केवलं यथाम्ररसस्यैव तथा ब्रह्मण एव। अत उक्तमात्मेत्येवोपासीतेति। एवकारोत्रापरिहार्यत्वेन चिदचित्तोः प्राप्तयोर्वारणार्थः। आत्मशब्दोत्र परमात्मवाचकः प्रकरणादेव। एतदेव सर्वं भगवत्या श्रुत्या स्वयमुच्यते—

अत्र ह्येते सर्वं एकं भवन्ति ॥ (१।४। ७)

अत्र ब्रह्मवेदनकाले सर्वे चिदचित्परमात्माचेत्येकं भवन्ति परस्परानुपमर्देनैव तिष्ठन्ति ॥

तदेतत्पदनीयमस्य सर्वस्य यदयमात्मा (१।४।७)

पुनस्तस्यैव निर्णिनीषयाह—पदनीयं प्रापणीयं वेद्यं तदेतत्। किं तत्? यदयं सर्वस्यास्य चिदचित्पदार्थजातस्यात्मा। नहि जीवात्मा सर्वात्मा भवति। ब्रह्मैव परमात्मैव सर्वस्यात्मा। अतः स एव सर्वैः पदनीय इति॥ १।४।७॥

तदेतत्प्रेयः पुत्रात्प्रेयो मित्रात्प्रेयोन्यस्मात्सर्वस्मादन्तरतरं यदयमात्मा ॥ (१।४।८)

तदेतत् स चैष आत्मा परमात्मरूपः पुत्रादपि प्रेयान् मित्रादपि प्रेयानन्यस्मात्सर्वस्मादपि सम्बन्धिनोन्तरतरः। पुनः स्मारयति यदयमात्मा तमुद्दिश्यैवैषोक्तिरिति।

स योन्यमात्मनः प्रियं ब्रुवाणं ब्रूयात्प्रियं रोत्स्यतीतीश्वरो ह तथैव स्यात् ॥ (१।४।८)

स यो जीवात्मात्मनः स्वस्याप्यात्मनः सर्वेषामप्यात्मनो ब्रह्मरूपादन्यं प्रियं ब्रवीति तथाविधं ब्रुवाणं प्रति ब्रूयादुपदिशेत्। किं ब्रूयात्? प्रियं रोत्स्यतीति। त्वं स्वप्रियं रोत्स्यसीति। अतथाभूतं चेत्तथाभूतं मन्यसे त्वं प्रियं विनाशयिष्यसीति तस्माद्दूरे स्थास्यसीति। पुरुषव्यत्यय औपनिषदः। ईश्वरो ह तथैव स्यात्। ईश्वरशब्दोत्र न पौराणिकेश्वरवाचकः। न वा ब्रह्मवाचकः। तस्य रोत्स्यतीतिक्रियया न सम्बन्धः। इतिना निरुद्धत्वात्। अत ईश्वरशब्दोत्र विभक्तिप्रतिरूपकोव्ययः। अवश्यं स तथैव स्यात्। कीदृशः स्यात्? परमात्मानं प्रियं ब्रुवाणः स्यात्परमात्सदृशः स्यात्। यश्च परमात्मनोन्यं प्रियं ब्रुवाणो मन्यमानः स्यात्तथैव स्यादन्यादृश एव स्यात्। न हि स स्वरूपमवगन्तुं शक्नुयादितिभावः॥

आत्मानमेव प्रियमुपासीत ॥ १।४।८)

आत्मानं स्वस्यात्मानं परमात्मानमेव प्रियं मत्वोपासीत॥

स य आत्मानमेव प्रियमुपास्ते न हास्य प्रियं प्रमायुकं भवति ॥ (१।४।८

फलश्रुतिमाह। स य आत्मानं परमानमेव प्रियं मत्वोपास्ते नास्य प्रियं प्रमायुकं नष्टं भवति। अयमाशयः। यदि परमात्मानमेव प्रियं मत्वा य उपास्ते स परमात्मस्वरूपो भवति। सर्वदुःखविनिवृत्तो भवति। न तस्य स प्रियः परमात्मा दूरे तिष्ठति। दूरावस्थानमेव प्रमायुकशब्दहृदयम्॥ १।४।८॥

यद्ब्रह्म विद्यया सर्वं भविष्यन्तो मनुष्या मन्यन्ते किमु तद्ब्रह्मावेद्यस्मात्सर्वमभवदिति ॥ (१।४।९)

भविष्यन्तो भवन्तो मननशीला जीवा विद्यया ज्ञानेन यद्ब्रह्म मन्यन्ते सर्वं दृश्यमानं निखिलं हि तद्ब्रह्मैव। शरीरशरीरिणोरभेदाध्यवसायात्सर्वं दृश्यमानं ब्रह्मशरीरं जीवजगद्रूपं ब्रह्मैव मन्यन्ते। तद्ब्रह्मावेद्यजानाः किमु? यज्ज्ञानेन सर्वं ब्रह्माभवद्भवतीति॥ १।४।९॥

किं तस्य ज्ञानस्य स्वरूपं येन ज्ञानेन सर्वं ब्रह्मरूपमेव प्रतिभातीत्याह—

ब्रह्म वा इदमग्र आसीत्तदात्मानमेवावेत् ॥ (१।४।१०)

अग्रे सृष्टेः पूर्वमिदं शास्त्रोपवर्णितं ज्ञानेन ज्ञानिभिः प्रत्यक्षीकृतं वा ब्रह्मैवासीत्। वेत्ता तदा तमात्मानं स्वस्यात्मेत्येवावेत्। स्वात्मत्वेनाजानादित्यर्थः।

एतज्ज्ञानस्य फलमाह—

अहं ब्रह्मास्मीति ॥ (१।४।१०)

ब्रह्मात्मकत्वाद्ब्रह्मशरीरत्वाद्वाहमपि ब्रह्मैवास्मीति। अत्र वेत्ता स्वं ब्रह्मात्मकं ब्रह्मात्मा यस्य तथा-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

भूतमात्मानमवेदित्युक्तम् । तद्वेदनस्य फलमाह—अहं ब्रह्मास्मीति । यद्युपासको वा ज्ञानी वा ब्रूयादहं ब्रह्मस्मीति तदा तस्याज्ञत्वमेव परिकल्पितं स्यात् । न ह्येतत्तद्भवति । परन्तु तादात्म्यबुद्धयाहं ब्रह्मास्मीति ब्रुवन्वा भावयन्वानुभवन्वा ब्रवीति याथार्थ्येनैव ब्रवीति तत् । अतो न हि जीवो जीवत्वं विहायाब्रवीदहं ब्रह्मेति किन्तु ब्रह्मशरीरत्वेनात्मानं विज्ञायाब्रवीदहं ब्रह्मेति ॥

एतज्ज्ञानस्य फलमाह—

तस्मात्तत्सर्वमभवदिति ॥ (१।४।१०)

वृत्त्यनुसारि हि फलं भवति । यादृशी मनोवृत्तिस्तादृशं फलं भवति । यदोपासक आत्मानं तदात्मत्वेन व्यजानात् तस्मात्तज्ज्ञानाद्भेदबुद्धेरपगमेन सर्वत्र स्वमेव पश्यति परमात्मस्वरूपं वा । तदानीमेव स पूर्णत्वमेति ॥

आत्मा ह्येषां स भवति (१।४।१०)

स परमात्मा सर्वेषामेषां जागतिकानां पदार्थानां जीवात्मनां चाप्यात्मैव भवति । सर्वेषु व्यापकत्वात्सर्वेषां रक्षकत्वापर एवात्मा भवति ॥

अथ योन्यां देवतामुपास्तेन्योसावन्योहमस्मीति न स वेद यथा पशुरेवं स देवानाम् ॥ (१।४।१०)

अथ उक्तार्थाद्विपरीतं यदि योन्यां देवतां स्वस्माद्भिन्नां मत्वा तां देवतां ब्रह्मरूपामुपास्तेर्थादन्योसौ परमात्मान्यश्चाहमस्मीत्यन्यत्वेन यः परमेश्वरदेवतामुपास्ते न स वेद परमात्मानं स्वकल्याणपथं चेति । नास्ति यस्येदृग्विवेकः स देवानां विदुषां मध्ये पशुतुल्य एवेति । परमात्मा हि सर्वेषां शरीरी । शरीरशरीरिणोरभेद एव स्वीकार्यः । यत्राभेदस्तत्र न भेदबुद्धिः शिवाय भवति । यस्तु परमात्मानमुद्दिश्यासावन्योहं चान्य इति भेदबुद्धिमवकल्पयति पशुत्वमेवात्मनि पुष्णातीति । एवं च शरीरशरीरिभावङ्गीकारेण जीवपरमात्मनोरभेद एव निश्चेयः परं भेदसहिष्णुरेव सोभेदः ॥ १ । ४ । १० ॥

यो वै स धर्मः सत्यं वै तत् ॥ (१।४।१४)

सत्यस्य माहत्म्यं गीयते । यो वै स धर्मस्तत्सत्यमेव । सत्यात्परं कञ्चिद्धर्मं न विजानाति श्रुतिः । सत्यमेव धर्मः । धर्मं एव सत्यम् । सत्यधर्मयोः समाना कोटिः । सत्याद्व्यतिरिक्तो धर्मो नास्ति ॥

इदमेव स्पष्टयितुं पुनराह निरलसा श्रुतिः—

तस्मात्सत्यं वदन्तमाहुर्धर्मं वदतीति धर्मं वा वदन्तं सत्यं वदतीति ॥ (१।४।१४)

सत्यं वदन्तं देवदत्तं जना वदन्ति देवदत्तो धर्मं वदतीति । धर्मं वा वदन्तं वदन्ति सत्यं वदतीति । ननु सत्यं वदन्तं वदन्ति स धर्मं वदतीति तु सत्यम् । परन्तु धर्मं वदन्तं वदन्ति सत्यं वदतीत्यत्र प्रष्टव्यमेतत्कीदृशं धर्मवदनं सत्यं भवतीति । यदि सत्यधर्मयोर्नास्ति विभेदस्तर्हि धर्मवदनं सत्यं भवतीति वचनस्य को नामाशयः ? उच्यते । न ह्यत्र लौकिकरीत्या धर्मशब्द उच्चरितः । धारणाद्धर्मः, धरणीयमेव ग्रहणीयमेव धर्मशब्देनाप्युच्यते सत्यशब्देनापि । सत्यं वदति धर्मं वा वदतीत्युभयोर्वाक्ययोः सत्यधर्मयोः पर्यायवाचकत्वम् । एवं च धर्मशब्द उच्चार्यः सत्यशब्दो वा न तत्र कश्चिद्भेदं पश्यति बृहदारण्यकोपनिषदिति ॥ १।४।१४ ॥

ब्रह्मदर्शनं प्रशंसति—

अथ यो ह वा अस्माल्लोकात्स्वं लोकमदृष्ट्वा प्रैति स एनमविदितो न भुनक्ति यथा वेदो वाननूक्तोन्यद्वा कर्माकृतम् ॥ (१।४।१५)

योहि मनुष्योस्माल्लोकाज्जन्मनः एवं स्वं द्रष्टारमदृष्ट्वा प्रैति शरीरं जहाति सोविदितोज्ञातोननुभूतो लोकः सर्वद्रष्टा परमात्मा न भुनक्त्येनं न रक्षति । अननुभूतब्रह्मा मानवो न श्रेयः पश्यतीतियावत् । तत्र दृष्टान्तमाह—यथाननूक्तोनध्यापितो वेदो गुरुमुखादश्रुतो वेदो न रक्षति याथार्थ्येनार्थं न वदति । अन्यद्वा लौकिकं कर्म यद्यकृतं न फलं सम्पादयति तथैव परमात्मानमजानन्न परमात्मना रक्षितो भवतीति भावः ॥ १।४।१५ ॥

पुरुषो वा अक्षितिः ॥ (१।५।२)

क्षितिः क्षयः । न क्षितिर्यस्य सोक्षितिरक्षयः । पुरुषोक्षयोविनाशीत्यर्थः ॥१।५।२॥

त्रीण्यात्मनेकुरुतेति ॥ (१।५ ३)

पर आत्मा । आत्मनेतति सातत्येन यावन्मोक्षं

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

देहाद्देहान्तरं गच्छतीत्यात्मा। तस्मै जीवायेतिभावः। त्रीणि वस्तून्यकुरुतोदपादयत् ॥

कानि तानीत्याह—

मनो वाचं प्राणं तान्यात्मनेकुरुत ॥ (१।५।३)

आत्मन आत्महितायेत्यर्थः। मनो ज्ञानसाधनम्। वाक् स्वसमीहितार्थप्रकटनसाधनम्। प्राणो जीवनधारयित्री शक्तिः। इत्येतत्त्रयमकुरुतेति ॥

मनो ज्ञानसाधनमिति निश्चाययति—

अन्यत्रमना अभूवं नादर्शम्। अन्यत्रमना अभूवं नाश्रौषमिति ॥ (१।५।३)

दृशिश्रुतिक्रियासाधनं मन एव। यदि कश्चिदन्यमनस्कः स्यादसावधानमना वा स्यात्समीपतो गच्छन्तमपि पुरुषं न पश्यति, समीप एवोच्चरितं शब्दं च न शृणोति ॥

एतदेव स्पष्टयति—

मनसा ह्येव पश्यति मनसा शृणोति ॥ (१।५।३)

स्पष्टेयं श्रुतिः। अत्र हीति एवेति द्वे अव्ययपदे। ते पृथक्कृत्यैवं योजनीये मनसा हि पश्यति मनसैव-शृणोतीति। ननु कथमिदमबद्धमुच्यते मनसा पश्यति मनसा शृणोतीति। न हि दर्शनस्य साधनं मनो न वा श्रुतेः साधनमपि तत्। सत्यम्। येन विना यदनुपपन्नं तत्तस्य मुख्यं साधनम्। सत्यपि श्रवणसाधने मनसोनवधानतया समीपेपि शब्द उच्चरन्न श्रूयते। विस्फारितचक्षुष्कोपि समीपादेव गच्छन्तं कमपि न पश्यति। अतो मनो द्वारीकृत्यैव श्रोत्रेण किञ्चिच्छ्रुतं भवति दृशा च किञ्चिद्दृष्टं भवति। अतः प्राधान्यद्योतनायैव मनसेत्युक्तिः ॥

न केवलं दृशिसाधनं वा श्रुतिसाधनं वा मनः। इतोप्यधिकं कार्यं तस्येत्याह—

कामः संकल्पो विचित्सा श्रद्धाश्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरित्येतत्सर्वं मन एव ॥ (१।५।३)

काम इच्छा। सङ्कल्पो मयेदं कर्तव्यमिति मानसं दार्ढ्यम्। विचिकित्सा संशयः। श्रद्धा दृष्टेष्वप्यदृष्टेष्वप्यर्येषु प्रीतिविशेषः। अश्रद्धा तद्विपरीततया बोध्या। धृतिरापत्कालेनवसादः। अधृतिर्दुःखाद्यप्रियसन्निधाने व्याकुलता। ह्रीर्लज्जा। धीर्बुद्धिः। भीर्भीतिः। इत्येतत्सर्वं मन एव। ननु युगपज्ज्ञानानुत्पत्तिर्मनसो लिङ्गमिति गौतम आह। कथं सङ्कल्पादीनां मनस्त्वम्। कथं वा पूर्वोक्तानां बृहदारण्यकवचनानामेवं संगतिरिति। अत्रोच्यते कामादीनां साधनं मनः। साध्याश्च कामाद्याः। साध्यसाधनयोरैक्येन कामादिष्वपि मनस्त्वमाह श्रुतिः ॥

साधनं वा कारणं वा मन स्वीकृत्यैवोच्यते—

तस्मादपि पृष्ठत उपस्पृष्टौ मनसा विजानाति ॥ (१।५।३)

तस्मादेव मनसो ज्ञानकारणत्वादेव पृष्ठतः केनचित्पिपीलिकावृश्चिकादिना दष्टोदृष्ट्वापि विजानाति पिपीलिकया दष्टोस्मि वृश्चिकेन वा कुड्मलेन वा दष्टोस्मीति। अतो ज्ञानस्य मुख्यं साधनं मन एव चक्षुरादीनां तु गौणता। अपिरेवार्थकः। अथवा भिन्नक्रमोत्र। पृष्ठतोप्युपस्पृष्ट इति योजना ॥

वाचं लक्षयति—

यः कश्चनशब्दो वागेव ॥ (१।५।३)

यः कश्चन शब्दो जिह्वयोदीरितो वाग्भवति। रेडियोयन्त्रोच्चारितस्तडित्समाचारग्राहकयन्त्रोच्चारितः शब्दोपि वागेव। येन केनापि जिह्वावता प्राणिनोच्चारितमेव शब्दं गृहीत्वा तद्वदति गायति रोदिति हसति च। तडित्समाचारग्राहकयन्त्रमपि लिखितमुक्तं वान्यया रीत्या वदति। जिह्वेत्यल्पमुक्तं भवति। जिह्वामन्तरेणापि केनचिदन्येनाप्युपायेन गृहीतो वा शब्दो वागेवेति। इदं तु ध्येयं पर्णादीनां मर्मरादिशब्दः पाषाणादीनां च खट्खडिति शब्दो न वाक्छब्दाभिलप्यः।

सैषा ह्यन्तमायत्ता ॥ (१।५।३)

सैषा वागन्तमभिधेयस्यान्तमितियावत्। आयत्ता प्राप्ता। यत्किञ्चिदभिधेयं भवति साकल्येनैवेयं तत्प्रकाशयति न किञ्चिदवशेषयति। वचेर्हि वाक्। वच परिभाषणे। परित्युपसर्गोत्र साकल्यपर्यवसायीति ॥

परन्तु—

एषा हि न ॥ (७५।३)

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

हीति निश्चिनोति। एषा वाक्तुं नान्तमायत्ता। वाचां नास्ति पर्यवसानम्। अर्थपर्यवसानाद्वाक्पर्यवसानमित्यन्यदेतत्। वस्तुतो वाङ्नान्तवती। अर्थो ह्यन्तवान् ॥

प्राणभेदानाह—

प्राणोपानो व्यान उदानः समानोन इत्येतत्सर्वं प्राण एव ॥ (१।५।३)

मुखनासिकासंचारी वायुः प्राणः। मूत्रपुरीषाद्यधोनयनादपानः। सर्वशरीरगो वायुर्व्यानः। अन्नादिरसानामूर्ध्वगमनादिहेतुरुदानः। भुक्तपीतपदार्थानां समं नयनात्समानः। अन इति प्राणादीनां पूर्वावस्था। स च केवलं वायुरेव। विभिन्नक्रियासंयोगान्नाम्नो वैभिन्न्यम्। भिन्नभिन्नक्रियानिर्वाहकत्वेन भिन्नत्वेन प्रतीयमाना अप्येते वस्तुतो न भिन्नत्वमवगाहन्ते ॥

पुनरात्मतत्त्वं निर्वर्णयति—

एतन्मयो वा अयमात्मा ॥ (१।५।३)

स्पष्टम्।

अत्रैतच्छब्देन किं जिघृक्षितमित्याह—

वाङ्मयो मनोमयः प्राणमयः (१।५।३)

प्राचुर्यार्थे मयट्। वाचैव प्रत्याय्य आत्मा। मनसैव वा प्रत्याय्य आत्मा। प्राणैर्वा प्रत्याय्य आत्मा। वाचात्मधर्मान् ब्रुवाण आत्मानं प्रत्याययति। मनसा साक्षात्कुर्वन्वात्मानं प्रत्याययति। प्राणसंयमनेन वा ध्यानादीनां तमात्मानं प्रत्याययति प्रत्येति चेत्यपि सर्वत्र वेद्यम्। नान्येन साधनेनात्मा प्रत्याय्य इतिभावः १।५।३॥

त्रयोवेदा एत एव ॥ (१।५।५)

त्रयो वेदा अपि एत एव एतन्मया एवेत्यर्थः वाङ्मनः प्राणमया इत्यर्थः। के ते त्रयो वेदा इत्याह नामतः—

वागेवर्ग्वेदो मनो यजुर्वेदः प्राणः सामवेदः ॥ (१।५।५)

अध्ययनाध्यापनार्हत्वाद् वागुपमित ऋग्वेदः। मननीयत्वान्मन उपमितो यजुर्वेदः। सामवेदस्यर्ग्वेदानतिरिक्तत्वादपि लघुकायत्वाच्छीघ्रं सम्पादनीयत्वात्प्राणप्रियत्वाच्च सामवेदः। वस्तुतस्त्वेतत्सर्वं ब्राह्मणरीत्योपपादितं वेदितव्यं नोपनिषद्रीत्या न वा तात्त्विकरीत्या। ऋग्वेदादीनां स्वतन्त्र्येणैवास्तित्वं सर्वविद्वत्प्रसिद्धम् ॥ १।५।५ ॥

अथ त्रयो वाव लोकाः ॥ (१।५।१६)

यथा त्रय एव वेदास्तथैव लोका अपि त्रय एव। नात्र चतुर्दशानां लोकानां प्रस्तावना। पारिभाषिका एते लोकाः ॥

के ते लोका इत्याह—

मनुष्यलोकः पितृलोको देवलोक इति ॥(१।५।१६)

कस्तावन्मनुष्यलोक इत्याह—

सोयं मनुष्यलोकः पुत्रेणैवःजय्यो नान्येन कर्मणा॥ (१।५।१६)

सोयं वर्तमानो मनुष्यलोकः पुत्रेणैव जय्यो जेतुं शक्यो भवति। नान्येन साधनेन। अयं भावः। यदि पुत्रः सुशीलः स्याद्विद्वान्वा स्याद्दाता वा स्यात्समाहर्ता वा स्याच्छ्रेयसां पिता प्रतिष्ठितो भवति लोके। अन्येन केनापि कर्मणा मनुष्यलोको न जय्यः। ननु किमर्थमयं निषेधः ? स्वविद्यया स्वकर्मणा स्वसदाचारेणापि जय्य एव मनुष्यलोकः। सत्यं जय्यः। तथापि मनुष्यलोकस्य प्रतिष्ठा पारम्पर्येण समागतानां कुलाचाराणां च संरक्षणं प्रायेण पुत्राधीनतां गते। तस्मात्तथाहेति। तदेवोक्तमग्रे-

"स पुत्रेणैवास्मिल्लोके प्रतितिष्ठतो"ति ॥ (१।५।१७)

कर्मणा पितृलोकः ॥ (१।५।१६)

पितृलोकः कर्मणा जय्यः। पितुर्लोकः पितृलोकः। स च पितैव। स च कर्मणा सत्कर्मणा जय्यः। पुत्रेण क्रियमाणानामनुष्ठीयमानानामनुष्ठितानामनुष्ठास्यमानानां च सत्कर्मणां दर्शनेन पिता प्रसीदति। पितृप्रसादनमेव पुत्रस्य जयः ॥

विद्यया देवलोकः ॥ (१।५।१६)

देवानां विदुषां लोको देवलोकः। देव इत्यर्थः स च विद्वानेव। स च विद्यया जय्यः। विद्यां निरीक्ष्य विदुषामन्तःप्रसीदतीति। मनुष्यलोकपितृ लोकापेक्षया देवलोकस्य श्रेष्ठतां विधत्ते—

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

देवलोको वै लोकानां श्रेष्ठः।
तस्माद्विद्यां प्रशंसति ॥ (१५।१६)

लोकानामुपरी परिगणितानां त्रयाणां मध्ये देवलोको वै श्रेष्ठः। विद्वानेव श्रेष्ठो भवति सर्वदृष्टाविति। देवलोकस्य प्रशंसनं विद्याप्रशंसनमेवावगन्तव्यम् ॥ १५।१६ ॥

न ह वै देवान् पापं गच्छति ॥ (१५:२६)

विद्वांसो हि देवाः। ये हि विद्यावन्तो ज्ञानवन्तः सन्ति न तान् पापं गच्छति। विवेकिनस्ते न पापं पापाधायकं वा कर्म कुर्वन्तीत्यर्थः। अत एव देवलोको विद्वानित्यर्थः सर्वलोकानां श्रेष्ठः। १५।२० ॥

इति बृहदारण्यकोपनिषदि प्रथमोध्यायः समाप्तः ॥

अथ बृहदारण्यकोपनिषदि

द्वितीयोध्यायः

दृप्तबालाकिर्हानूचानो गार्ग्य आस ॥

बलाकस्यापत्यं बालाकिः। अनूचानो वेदाङ्गाध्यायी। गर्गस्य गोत्रापत्यं गार्ग्यः। दृप्तो गर्विष्ठो गार्ग्योनूचानो बालाकिरास बभूव ॥

स होवाचाजातशत्रुं काश्यं ब्रह्म ते ब्रवाणीति।

स बालाकिरजातशत्रुनामानं काशिराजमभ्येत्योवाच पप्रच्छ—अहं ते तुभ्यं ब्रह्म ब्रवाण्युपदिशानीति। यदि स्यात्तवेच्छा ब्रह्म श्रोतुं ज्ञातुमहं श्रावयामि ज्ञपयाम्युपदिशामीत्युवाच ॥

स होवाचाजातशत्रुः सहस्रमेतस्यां वाचि दद्मो जनको जनक इति वै जना धावन्ति॥ (२ । १ । १)

सोजातशत्रुरुवाच जनक इति ब्रह्मोपदेष्टा बहुश्रुतः। तमेव जना ब्रह्मज्ञानाय धावन्ति गच्छन्ति। धावन्तीत्युत्कटजिज्ञासाद्योतनार्थम्। अथवेर्ष्याप्रदर्शनार्थम्। भवांस्तु मत्सविधे मां ब्रह्मोपदेशकाम आगतवान्। आगत्य चोक्तवान् "ब्रह्म ते ब्रवाणी"ति। तत एतस्यां वाचि निमित्तार्थे सप्तमी। एतां वाचं निमित्तीकृत्य सहस्रं सुवर्णानि दद्मः। सुवर्णानि वीक्ष्य हर्षातुरो गार्ग्यो ब्रह्मोपदेशाय कृतपरिकर उवाच—

य एवासावादित्ये पुरुषस्तमेवाहं ब्रह्मोपास इति।

आदित्यस्थः पुरुष एव ब्रह्मेति। तमेवाहं पुरुषमुपासे।

राजोवाच—

अहमेतमुपास इति ॥ (२।१।२)

स्पष्टम्।

पुनर्गार्ग्योवदत्—

य एवासौ चन्द्रे पुरुषस्तमेवाहमुपासे।

राजोवाच—

अहमेतमुपास इति ॥ (२।१।३)

स्पष्टम्।

पुनर्गार्ग्य आह—

य एवासौ विद्युति पुरुष एतमेवाहं ब्रह्मोपास इति।

राजोवाच —

अहमेतमुपास इति ॥ (२।१।४)

पुनर्गार्ग्य आह—

य एवायमाकाशे पुरुष एतमेवाहंब्रह्मोपास इति।

राजोचाच—

अहमेतमुपास इति ॥ (२।१।५)

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पुनर्गार्ग्य आह—

य एवायं वायौ पुरुष एतमेवाहं ब्रह्मोपास इति।

राजोवाच—

अहमेतमुपास ॥ (२।१।६)

पुनर्गार्ग्य आह—

य एवायमग्नौ पुरुष एतमेवाहं ब्रह्मोपास इति।

राजोवाच—

अहमेतमुपास इति ॥(२।१।७)

पुनर्गार्ग्य आह—

य एवायमप्सु पुरुष एतमेवाहं ब्रह्मोपास इति।

राजोवाच—

अहमेतमुपास इति ॥ (२।१।८)

पुनराह गार्ग्यः—

य एवायमादर्शे पुरुष एतमेवाहं ब्रह्मोपास इति।

स होवाचाजातशत्रुः—

अहमेतमुपास इति॥ (२।१।९)

पुनर्गार्ग्य आह—

य एवायं यन्तं पश्चाच्छब्दोनूदेति, एतमेवाहं ब्रह्मोपास इति।

अयमस्य भावः—यन्तं गच्छन्तं यः शब्दः पश्चादनूदेति प्रतिध्वनि रूपस्तमेव ब्रह्मेति मत्वोपास इति। स च प्रतिध्वनिरसुरित्ति। असुः प्राणः। प्राणेनैव शब्दाच्छब्दान्तरोत्पत्तिः। अतः कारणत्वादसुरो ब्रह्म। तदेवाहमुपास इति।

राजाह—

अहमेतमुपास इति ॥ (२।१।१०)

पुनराह गार्ग्यः—

य एवायं दिक्षु पुरुष एतमेवाहं ब्रह्मोपास इति।

राजोवाच—

अहमेतमुपास इति ॥ (२।१।११)

पुनर्गार्ग्य आह—

य एवायं छायामयः पुरुष एतमेवाहं ब्रह्मोपास इति।

राजाह—

अहमेतमुपास इति (२।१।१२)

पुनर्गार्ग्य आह—

य एवायमात्मनि पुरुष एतमेवाहं ब्रह्मोपास इति।

अजातशत्रु राजाह—

अहमेतमुपास इति ॥ (२।१।१३)

स ह तूष्णीमास गार्ग्यः ॥ (२।१।१३)

गार्ग्योजातशत्रुमुपदेष्टुं तदन्तिकं जगामेति प्रथमोपराधः। शिष्येण जिज्ञासुना गुरुरभिगन्तव्यो न गुरुणा कश्चन शिष्योन्वेष्टव्यः, अन्वेषणाय च राजगृहं गन्तव्यं राजगृहे च राजैव ग्रहीतव्य इति। धनजिघृक्षया ब्रह्मोपदेष्टुं स राजानमापेति द्वितीयोपराधः। धनलाभाय ब्रह्मोपदेशः केवलं व्यापारः। आदित्यादौ यः पुरुषस्तदेव ब्रह्मेति विज्ञापनेन न स प्रत्याययितुं शशाक किमिति ब्रह्मेति। आदित्यस्थं पुरुषं दर्शयितुं नाशक्नोत्सः। तमेव पुरुषं ब्रह्मेति मत्वाहमुपास इति सर्वत्राजातशत्रोरुत्तरम्। इदमपि केवलं बाललालनम्। सूर्यचन्द्राद्यस्थं पुरुषमजानान एव तमहमुपास इति तस्योत्तरम्। अत्रैव मल्लयुद्धमुभयोः समाप्तम्। गार्ग्यः परास्तः। क्षत्रियो राजा विजेताभवत्। गार्ग्यो विलज्जः सँस्तूष्णीं बभूव। मृतमेव मारयितुमुवाच काशिराजः "एतावान् ३ इति" (२।१।१३) एतावदेव त्वया ज्ञायते किम्? गार्ग्य आहागत्या "एतावद्धीति" (२।१।१३) हिर्निश्चये। एतावदिति। नातः परं ब्रह्मविषये जानामीति ॥ २।१।१३ ॥

मदोन्मत्तो गार्ग्यो राज्ञा कथितः—

नैतावता विदितं भवति ॥ (२।१।१४)

यत्त्वया ज्ञायते नैतावता ज्ञानेन ब्रह्म विदितं भवतीति। विलज्जितो वा जागरितजिज्ञासो वा गार्ग्य आह—

उप त्वा यानीति ॥ (२।१।१४)

अहं त्वां क्षत्रियमुपयानीति। भवच्छिष्यत्वं स्वीकृत्य भवन्तमुपगच्छामि ब्रह्मावगन्तुमिति ॥

हृष्टो राजोवाच—

व्येव त्वा ज्ञपयिष्यामि ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

त्वा विज्ञपयिष्याम्येव ब्रह्मेति । ततः परम् ।

तं पाणावादायोत्तस्थौ ॥

राजा तं हस्ते गृहीत्वोत्तस्थौ । उभावेवोत्तस्थतुरितिभावः ।

तौ ह पुरुषं सुप्तमाजग्मतुः ।

तावजातशत्रुर्गार्ग्यश्च सुप्तं कंचन पुरुषमाजग्मतुरागतवन्तौ ।

तमेतैर्नामभिरामन्त्रयाञ्चक्रे बृहन् पाण्डरवासः सोमराजन्निति ।

बृहन्निति पाण्डरवास इति सोमराजन्निति नामभिरामन्त्रयाञ्चक्रेजातशत्रुः । एभिर्नामभिस्तं सुप्तं पुरुषमाजुहावेतिभावः ।

स नोत्तस्थौ ।

सः सुप्तः पुरुषो नोत्थितवान् ।

तं पाणिनापेषं बोधयाञ्चकार ।

पाणिनापेषं पाणिना पिष्ट्वा बोधयाञ्चकार तं सुप्तं पुरुषं सोजातशत्रुः ।

स होत्तस्थौ ॥ (२।१।१५)

स उदस्थासीत् । एतस्य प्रघट्टकस्यायमाशयः—बालभाषया बालवुद्धिभ्योयमुपदेशः । पण्डितम्मन्यमान आत्मानं गार्ग्योजातशत्रुमुपेत्य तस्मै ब्रह्मोपदेष्टुं प्रतिज्ञातवान् । तेन यत्किञ्चिदुपदिष्टं तत्सर्वमजातशत्रुरजानादेव । निर्मथितमदः सन्नात्मानं शिष्यत्वेनाजातशत्रोर्हस्ते समार्पिपत् । अजातशत्रुरुवाच प्रतिलोममेवैतद्यद्ब्राह्मणो ब्रह्मज्ञानाय क्षत्रियमुपेयादिति । तच्छ्रुत्वा गार्ग्यः किञ्चिदपि नोवाच । तेन ज्ञायते स उदारचेता आसीत् । ब्राह्मणकुलोत्पन्नः सन्नपि क्षत्रियं ब्रह्मविद्यार्थमुपसन्नः । परमवगम्यत औषनिषद्काले क्षत्रिया बहवो ब्रह्मविद आसन् । अत एव बहवो ब्राह्मणकुमारा क्षत्रियान् ब्रह्मविद्यावाप्तय उपसन्नाः । किं च गार्ग्यः स्यान्नामाभिमानी जानेहं ब्रह्मेति । वस्तुतस्तस्य ब्रह्मविषयकं किञ्चिदपि ज्ञानं नासीत् । अतएव स कदाचिच्चन्द्रस्थं पुरुषं कदाचिद्विद्युत्स्थं कदाचिच्चान्यत्रस्थं पुरुषं ब्रह्मत्वेनोपासितारमात्मानं वेदयामास । वस्तुतस्तस्य केवलं तद्विषयको मोह एवासीत् । अतएवानाहूतोजातशत्रुमुपदेष्टुं गतवान् । अजातशत्रोर्ज्ञानगरिम्णा तस्य सर्व एव मदो व्यपगतः । ब्रह्मावगन्तुमुत्सुको गार्ग्योवगमयितुं च तत्तमजातशत्रुः कञ्चित्सुप्तं पुषमुपजग्मतुः । ब्रहन्, पाण्डरवासः सोमराजन्निति तं सुप्तं पुरुषमाजुवाह राजा परं न स ददावुत्तरम् । ततः परं पाणिना चालयित्वा तं जागराञ्चकार । स जजागार । अत्र किञ्चिदावश्यकं तत्त्वं विचार्याग्रे गन्तव्यम् । गार्ग्यो ब्रह्मबोधयितुमेवाजातशत्रुसविधे समागात् । यत्किञ्चिद्येन च प्रकारेण स ब्रह्माजानात् तस्मै भूपतये बोधयामास । ब्रह्मवेदन प्रघट्टके "व्येव त्वा ज्ञपयिष्यामि" इतिवचनखण्डेन ब्रह्मबोधनस्यैव प्रतिज्ञा । तं पाणावादाय ब्रह्मबोधनायैव भूपतिरुत्तस्थौ ततः । तदानीमत्र सुप्तस्य समीपे गमनमाश्चर्यजनकमेव भवति । सुप्त एष जागरणात्पूर्वं कुत्रासीत् कुतश्चागत इत्यादिना प्रश्नजातेन जीवस्यैव प्रसङ्गोत्रोषस्थित इति स्पष्टमेव । इतः परं जीवाभिलापिन्येव श्रुतिः । अत्रेदं द्रष्टव्यम्—अजातशत्रुर्ब्रह्मविद्यां गार्ग्य संक्रामयितुमशक्तः सन्नेवोवाच—"प्रतिलोममेवैतद्यद्ब्राह्मणः क्षत्रियमुपेयाद्ब्रह्म मे वयक्ष्तीति" (२।१।१५) अतएव "ब्रह्म वक्ष्यामी"-त्युपक्रान्तां क्रियां न प्रायुङ्क्त । "विज्ञपयिष्यामी"-(२।१।१५) त्येवावोचत् । एवं च ब्रह्म त्वा विज्ञपयिष्यामीति नास्यार्थः । ज्ञानमुपदेक्ष्यामोत्येव तस्य हार्दम् । यथा ब्रह्मज्ञानमुपदेष्टव्यमेवमेव जीवात्मज्ञानमप्युपदेष्टव्यम् । ब्रह्माजानानं मदान्वितं मोहविधुरं गार्ग्यं जीवात्मतत्त्वोपदेशेनैव कार्तार्थ्यं गतं मन्वानोजातशत्रुः सुप्तं पुरुषं दर्शयामास । बृहन्निति पाण्डरवास इति सोमराजन्नित च स तमामन्त्रयामास । सुप्तस्य पुरुषस्य नामाजानानो राजा येन केनापि नाम्ना तं जागरयितुं प्रयेते । अथवा राज्ञो बुद्धौ जीवात्मनो बृहत्त्वं महापरिमाणत्वं च स्थितं स्यादिति बृहन्निति सम्बोधनम् । स्वभावतो निर्दोषत्वाज्जीवात्मनः पाण्डरवास इति सम्बोधनम् । सोमेनोपलक्षणविधया शान्त्या राजत इति सोमराजन्नितिसम्बोधनेन स्वभावनिर्देशः ॥ २।१।१५ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

स यथोर्णनाभिस्तन्तुनोच्चरेद्
यथाग्नेः क्षुद्रा विस्फुलिङ्गा व्युच्चरन्ति,
एवमेवास्मादात्मनः सर्वे प्राणाः सर्वे लोकाः
सर्वे देवाः सर्वाणि भूतानि व्युच्चरन्ति ॥
(२।१।२०)

अनया श्रुत्या विज्ञापितं भवति यत्तदालोकनीयम् । अस्मादात्मन इति हेतौ पञ्चमी । अस्ति शरीर आत्मा तस्मादेव हेतोरात्मानमेव हेतूकृत्येत्यर्थः । सत्येवात्मनीति स्पष्टार्थः । प्राणा गतिशीला भवन्ति । सर्वे देवाः सर्वाणीन्द्रियाणि सर्वाणि च भूतानि व्युच्चरन्ति स्वस्वकार्याणि सम्पादयन्तीत्यर्थः । असत्यात्मनि निर्गतो शरीरादात्मनि न भवन्ति प्राणानां क्रिया न च भवन्ति लोका भोग्यपदार्थाः । न वा देवा नेन्द्रियाणि न वान्यानि भूतानि भूतेभ्यो जाता अपि पदार्थाः । इत्येव स्पष्ट आशयोस्य ब्राह्मणस्येति ॥ २।१।२० ॥

इति बृहदारण्यकोपनिषदि द्वितीयाध्याये
प्रथमं ब्राह्मणम् ।

अथ बृहदारण्यकोपनिषदि द्वितीयाध्याये

चतुर्थं ब्राह्मणम्

मैत्रेयीति होवाच याज्ञवल्क्यः, उद्यास्यन्वा अरेहमस्मात्स्थानादस्मि, हन्त ते नया कात्यायन्यान्तं करवाणीति ॥ (२।४।१)

द्विभार्यो याज्ञवल्क्यो मौत्रेयीं भार्यामुवाच हे मैत्रेयि, अहं याज्ञवल्क्योस्मात्स्थानाद्गृहस्थाश्रमादुद्यास्यन्नूर्ध्वं गमिष्यन्नस्मि । गृहस्थाश्रमं परित्यज्यात ऊर्ध्वमाश्रमं जिगमिषामीतिभावः । हन्त ते नया कात्यायन्या सम्बन्धस्यान्तं करवाणि कर्तुमिच्छामीत्याशयः । यत्किञ्चिद्वित्तं मम समीपे विद्यते तत्सर्वं द्विधा विभज्य युवयोर्वितरितुमिच्छामीति ॥ २।४।१॥

सा होवाच मैत्रेयी । यन्नु म इयं भगोः सर्वा पृथिवी वित्तेन पूर्णं स्यात्कथं तेनामृता स्यामिति ?

संसारासारतां जानन्ती मैत्रेयो याज्ञवल्क्यमुवाचापृच्छदित्यर्थः । प्रश्नमेवाह—भगोः सम्बोधनार्थेव्ययपदमेतत् । यद्यदि मे मदर्था मह्यं दीयमाना वा पृथिवीयं वित्तेन पूर्णा स्यात्तेनामृतामरणाधर्मा स्यामहं कथं किमु ? यद्यनेन लौकिकधनविभागेनाहममृतत्वं प्राप्नुयामिति तर्हि वदेति ।

नेति स होवाच याज्ञवल्क्यः ।

नेति । अमृतत्वप्राप्तिस्तु गार्गि धनेन धनलाभेन नैव स्यादित्याह याज्ञवल्क्यः ।

अन्यदप्याह—

यथैवोपकरणवतां जीवितं तथैव ते जीवितं स्यात् । अमृतत्त्वस्य तु नाशास्ति वित्तेन ॥ (२।४।२)

उपकरणं सांसारिकभोगसामग्री । तद्वतां यथा जीवितं ते तवापि तथैव स्यात् । सुखेन शान्त्याशान्त्या वा कथमपि धनेन जीवितधारणं तु स्यात्तव । परन्तु नैवास्याशा तेन मोक्षस्येति ।

सा होवाच मैत्रेयी येनाहं नामृता स्यां किमहं तेन कुर्याम् । यदेव भगवान्वेद तदेव मे ब्रूहीति ॥ (२।४।३)

मैत्रेयी प्रत्युवाच । येन वित्तेन नाहममृता भवेयं दुःखागारसंसारापारमहोदधेः पारं न प्राप्नुयां किं तेनाहं कुर्याम् । नास्ति मम नामृतत्वं गमयतानुत्तमेनापि भवीयेन वित्तेन प्रयोजनमिति भावः । अतो भगवान् भवान् यदेव वेद तदेव तत्त्वं भवभवमहापदागारादुद्धर्तुं परमसाधनं मह्यं ब्रूह्युपदिशेति ॥ २।४।३ ॥

स होवाच याज्ञवल्क्यः प्रिया बतारे नः सती प्रियं भाषसे । एहि । आस्स्व । व्याख्यास्यामि ते । व्याचक्षाणस्य तु मे निदिध्यासस्वेति ॥ २।४।४ ॥

महामोदमदोन्मत्तो याज्ञवल्क्य उवाच । बतेति हर्षे । अरे इत्याश्चर्यद्योतकमव्ययपदम् लौकिकस्य महाधनस्यापि तितिक्षा त्वयि वर्तते इति त्वं नोस्माकं प्रिया । प्रिया सती त्वं प्रियं मम रुचिकरं भाषसे । मदीयया सङ्गिन्या यद्वक्तव्यं तदेव त्वं भाषसे । एह्यागच्छ । आस्स्व मत्सविध उपविश सावधानमना भूत्वेतिभावः । वक्ष्यामि तेमृतत्वोपायम् । व्याचक्षाणस्य परमं तत्त्वमुपदिशतो मे ममोपदेशं श्रुत्वा तं निदिध्यासस्व पुनः पुनश्चिन्तयेति ॥ २।४।४ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

स होवाच। न वा अरे पत्युः कामाय पतिः प्रियो भवति। आत्मनस्तु कामाय पतिः प्रियो भवति॥ (२।४।५)

लोके दृश्यते पत्न्याः पतिः प्रियो भवति। परं पत्युः कामाय हिताय पतिः प्रियो न भवति किन्त्वात्मनः कामाय हिताय पतिः प्रियो भवति। भवत्येव प्रयोजनं पत्न्याः पतिसकाशात्सुवाससा सदालङ्कारेण गन्धमाल्यादिना च। एतेषां कामानां पूर्तय एव पत्न्याः प्रियो भवति पतिः। न स्याद्यदि कामपूर्ति न स्यात्पतिः प्रियः पत्न्या इत्युपदेशतात्पर्यम्।

एवम्—

न वा अरे जायायै कामाय जाया प्रिया भवति। आत्मनस्तु कामाय जाया प्रिया भवति।(२।४।५)

जायाया इति षठ्यर्थे चतुर्थी। जायाया हिताय जाया न भवति प्रिया पत्युः किन्त्वात्मनः पत्युः कामाय जाया प्रिया भवति। पत्न्याः साहचर्येण भवन्त्या भोगाविलासादिसम्पत्त्या पत्नी पत्यै प्रिया भवति। न स्याद्यदि स्वार्थलाभः सैव पत्नी न भवति पत्युः प्रियेति॥

एवम्—

न वा अरे पुत्राणां कामाय पुत्राः प्रिया भवन्ति। आत्मनस्तु कामाय पुत्राः प्रिया भवन्ति॥(२।४।५)

पुत्रेषु प्रेम पुत्रप्रियाय न भवति। पुत्रदर्शनस्पर्शनलालनादिभिः स्वस्यैव लाभाय सन्तोषाय च पुत्राः प्रिया भवन्तीति।

एवम्—

न वा अरे वित्तस्य कामाय वित्तं प्रियं भवति। आत्मनस्तु कामाय वित्तं प्रियं भवति॥ (२।४।५)

वित्तहिताय वित्तं न भवति प्रियं, वित्तार्थिनः कामाय वित्तं प्रियं भवतीति।

एवम्—

न वा अरे ब्रह्मणः कामाय ब्रह्म प्रियं भवति। आत्मनस्तु कामाय ब्रह्म प्रियं भवति॥ (२।४।५)

ब्रह्मणः कामाय न भवति प्रियं ब्रह्म। परन्तु तत्प्राप्तेः स्यात्सदानन्दो ममेत्यात्मनः कामायैव ब्रह्म प्रियं भवतीति॥

एवम्—

न वा अरे क्षत्त्रस्य कामाय क्षत्रं प्रियं भवति। आत्मनस्तु कामाय क्षत्त्रं प्रियं भवति॥ (२।४।५)

क्षत्रं रक्षकः क्षतात्त्रायत इति। तस्य कामाय स प्रियो न भवति किन्त्वात्मकामाय स मां रक्षिष्यतीति स प्रियो भवति॥

एवम्—

न वा अरे लोकानां कामाय लोकाः प्रिया भवन्ति। आत्मनस्तु कामाय लोकाः प्रिया भवन्ति॥ (२।४।५)

न लोकप्रीणनार्थं लोकसंग्रहः क्रियते। आत्मसंतोषायैव लोकसंग्रहः सर्वैः क्रियत इति।

एवम्—

न वा अरे देवानां कामानां देवाः प्रिया भवन्ति। आत्मनस्तु कामाय देवाः प्रिया भवन्ति॥ (२।४।५)

देवा ममाभिलाषं हार्दं सफलयिष्यन्तीति लोभेन देवानां प्रियत्वं सर्वत्र प्रथितम्। न हि देवानां कामाय देवाः प्रिया भवन्ति कस्यापीति॥

एवम्—

ना वा अरे भूतानां कामाय भूतानि प्रियाणि भवन्ति। आत्मनस्तु कामाय भूतानि प्रियाणि भवन्ति॥ (२।४।५)

भूतशब्देन प्राणिनामप्राणिनामपि संग्रहः। जडानां चेतनानां वा पदार्थानां लाभाय न तेषां प्रियत्वम्। किन्तु तैः स्वस्य लाभो भवति तत एव ते प्रियाः प्रतीयन्ते॥

एवम्—

ना वा अरे सर्वस्य कामाय सर्वं प्रियं भवति। आत्मनस्तु कामाय सर्वं प्रियं भवति॥ (२।४।५)

उपसंहरति—न हि सर्वस्य वस्तुजातस्य कामाय वस्तुजातं प्रियं भवति। आत्मनस्तु कामाय वस्तुजातं प्रियं भवति। तु ना एवकारार्थो ग्रहीतव्यः॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सर्वेषां भूतभौतिकपदार्थानां वैरस्यं प्रतिबोध्य सिद्धान्तयति–

आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः ॥ (२।४।५)

आत्मा तु आत्मकल्याणायैव प्रियो भवतीति स एव द्रष्टव्यः स एव श्रोतव्य. स एव मन्तव्यः स एव निदिध्यादितव्यः । दर्शनं तदनुभवः । श्रवणं तत्स्वरूपादेरेव गुरुमुखतः । मननं निदिध्यासनं च स्वाधीने ॥

दर्शनादीनां फलमाह––

मैत्रेय्यात्मनो वा अरे दर्शनेन श्रवणेन मत्या विज्ञानेनेदं सर्वं विदितं भवति ॥ (२।४।५)

निदिध्यासनं विज्ञानम् । आत्मन एव दर्शनश्रवणमननविज्ञानैरिदं सर्वं जगद्विदितं भवति । अत्र सर्वं विदितं भवतीत्यनेन सर्ववेदनं न विधीयते; सर्ववेदनानावश्यकत्वं हि बोध्यते । येन प्रयोजनं सिध्येत्तस्यैवावश्यकत्वम् । न हि जागतिकैः पदार्थैरात्मकल्याणप्रयोजनं सिध्यतीति तेषां दर्शनादेर्वैयर्थ्यम् । अत्रात्मशब्दो न ब्रह्मवाचको जीववाचक एव । अत एवाधस्तादुपदिश्यमाना श्रुतिः सफला भवति ॥ २।४.५॥

ब्रह्म तं परादाद्योन्यत्रात्मनो ब्रह्म वेद ।
क्षत्त्रं तं परादाद्योन्यत्रात्मनः क्षत्त्रं वेद ।
लोकास्तं परादुर्योन्यत्रात्मनो लोकान्वेद ।
देवास्तं परादुर्योन्यत्रात्मनो देवान्वेद ।
भूतानि तं परादुर्योन्यत्रात्मनो भूतानि वेद ।
सर्वं तं परादाद्योन्यत्रात्मनः सर्वं वेद ॥
(२।४।६)

अत्र"ब्रह्म तं परादात्" इति कथनेनात्मेव ब्रह्म नात्मातिरिक्तं किञ्चदन्यद्ब्रह्मेति समुपदिष्टं भवति । अनेन प्रघट्टकेनावश्यमात्मातिरिक्तं ब्रह्म निषिध्यत एव । न ह्यत्र ब्रह्मात्मनोः पर्यायवाचकत्वम् । आत्मनां वेद्यत्वस्यावशिष्टतया ब्रह्मणश्च वेद्यत्वाभावेव नानयोरेकरूपता सम्भावनीया । गुणधर्मविरोधात् ।

अत एव—

इदं ब्रह्मेदं क्षत्त्रमिमे लोका इमे देवा इमानि भूतानीदं सर्वं यदयमात्मा ॥ (२।४।६)

अनया श्रुत्यात्मव्यतिरिक्तं किञ्चिद्ब्रह्म नास्तीति स्पष्टमभिधीयते । इदं सर्वं यदयमात्मेत्यस्येदं सर्वमस्यात्मन इत्यर्थो विज्ञेयः । औपनिषदः प्रयोगः ॥ २।४।६ ॥

यथार्द्रैधाग्नेरभ्यहितात्पृथग्धूमा विनिश्चरन्ति, एवं वा अरे अस्य महतो भूतस्य निश्वसितमेतत् ॥
(२।४।१०)

यथार्द्रैधादार्द्रकाष्ठादभ्यहितात्प्रवर्तितादग्नेः पृथग्घूमा विभिन्नरङ्गधूमा विनिश्चरन्ति निर्गच्छन्त्येवमस्य महतो भूतस्यैतज्जगन्निश्वसितम् । महतो भूताज्जगन्निश्वसितमित्यर्थः । अत्र विशेषेण किञ्चिद्विचारणीयम् । "अग्नेः पृथग्धूमा विनिश्चरन्ती"त्युदाहरणम् । "अस्य महतो भूतस्य निश्वसितमेत"दित्युदाहरणम् । न ह्यत्राग्नेर्धूमा निस्सरन्त्यार्द्रकाष्ठादेव ते निस्सरन्ति । एवं च धूमोपादानता काष्ठनिष्ठा न तु वह्निनिष्ठा । एवमत्र ब्रह्मणस्तु नामापि न श्रूयतेतो "अस्ये" त्यस्य जीवात्मन इत्येवार्थः । "महतो भूतस्ये"त्यस्य महतो ब्रह्मण इत्यर्थः कथमपि न संगच्छते । न हि ब्रह्म भूतमिति । शरीरशरीरिणोरैक्यादपि न ब्रह्मणि भूतशब्दप्रयोगोपपत्तिः । न हि जगच्छब्देन जगत्स्वामिग्रहणमौचित्यं धत्ते । अतः कार्यावस्थामुपगतस्य भूतस्य परमाणुरूपस्यैतन्निश्वसितमित्यर्थः समीचीनतां धत्ते । न हि भूतशब्देन ब्रह्मणो ग्रहणं वेदितव्यम् । जीवात्मनो ग्रहणं तु न्याय्यम् । सूक्ष्मावस्थातः स्थूलावस्थावाप्तिरेव भूतत्वम् । यद्यप्यात्मनोवस्थाद्वयी न स्वाभाविकी तथापि सूक्ष्माचित्सम्बन्धेनैव तस्य यथा सौक्ष्म्यं तथैव स्थूलाचित्सम्बन्धेन तस्य स्थूलत्वमपि निर्वोढव्यम् । महद्भूतं ह्युपादानम् । ब्रह्मणि नोपादानता । शरीरशरीरिणोरभेदस्वीकारेण यथाकथञ्चिदुपगच्छन्त्यप्युपादानता न ब्रह्मणि विश्राम्यति । असम्भवात् । शरीरभूतायामचित्येवतद्विश्रान्तिः । एवं च यथार्द्रैधाग्नेर्धूमा निर्गच्छन्ति तथा महतो भूतान्निस्सरदेतदखिलं निश्वसितमात्रम् । अत्र महाभूतशब्देन न ब्रह्मणो ग्रहणम् । उपादानकारणं ह्यत्र गृहीतम् । अग्निविशिष्टार्द्रेन्धनं धूमस्य कारणं तथैव चेतनविशिष्टमहाभूतं जगतः कारणम् । सांख्यसिद्धान्तोत्र विलसति । अत्रैतन्निश्वसितमित्यत्रैव वाक्यसमाप्तिः । एतच्छब्देन दृश्यमानं जगद्ग्राह्यम् ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ऋग्वेदो यजुर्वेदः सामवेदोथर्वाङ्गिरस इतिहासः पुराणं विद्या उपनिषदः श्लोकाः सूत्राण्यनुव्याख्यानानि व्याख्यानान्यस्यैव निश्वसितानि ॥ (२।४।१०)

एता निखिला विद्या अपि तस्यैवात्मनो निश्वनरूपाः। अनायासेनैव विद्वद्भिरात्मभिः क्रमशः शनैः शनैरेता विद्याः सम्पादिता इति। इतिहास इति ह आसेतिवर्णनरूपः। पुराणं पुरा नवं भवतीति। पुराणमित्येकवचनप्रयोगेण नाष्टादश पुराणान्यभीष्टानीह। एवं च पुराणशब्देनात्रेतिहास एवाभीष्टः। विद्याशब्देन चोपनिषदः। न हि विद्या अतिरिच्यन्त उपनिषद्भ्यः। श्लोकाः स्तोत्रसंघाताः॥ २।४।१० ॥

जगत्कारणं महद्भूतमुद्दिश्य ब्रवीति यथा लवणखण्ड उदके प्रास्त उदक एव विलीनो भवति न हि पार्थक्येन तत्र लवणप्रतीतिर्भवति लवणमयमेव तदुदकं भवति—

एवं वा अरे महद्भूतमनन्तपारं विज्ञानघन एव, एतेभ्यो भूतेभ्यः समुत्थाय तान्येवानुविनश्यन्ति ॥ (२।४।१२)

एवमिदं महद्भूतमनन्तपारं न विद्यते पारो यस्य तत्। इदं भूतं कदोत्पन्नं कियत्कालपर्यन्तं च स्थास्यतीति ते केनाप्यवगम्यतेतोनन्तपारम्। किं च विज्ञानघन एव। घनशब्दो जात्यन्तप्रतिषेधपरः। विज्ञानं च तद्घनश्चेति विज्ञानघनः। घनशब्दो पुंल्लिङ्गे नियतः। यदि घनशब्दो जात्यन्तरप्रतिषेधपर एवकारः किंप्रयंजनक इतिदप्यर्थकः। अनन्तपारमपि विज्ञानघनोपि तन्महद्भूतमिति। सर्वं एव पदार्था नामरूपात्मका एतेभ्यो भूतेभ्यः समुत्थायोद्भूय तान्येव भूतान्यनुविनश्यन्ति कार्याणि स्वकारणेषु विलीनन्तीत्यर्थः। अत्र यदि न स्यादाकर्षणमपकर्षणं विकर्षणं वान्येषां शब्दानां तर्ह्यस्याः श्रुतेरेष एवार्थः। एवं च भूतेभ्य उद्भूय पदार्थाः पुनस्तान्येव प्रविशन्ति। महद्भूतमनन्तपारमि-(२।४।१२) तिवचनेन भूतस्यानन्त्यम्। अनन्तत्वादेव तस्यैतेभ्यो भूतेभ्य इत्यत्र बहुवचनं नान्याय्यम्॥

न प्रेत्य संज्ञास्तीति होवाच याज्ञवल्क्यः॥ (२।४।१२)

प्रेत्यानुविनशनानन्तरं न संज्ञास्ति। केषां संज्ञा नास्ति? भूतेभ्यः समुत्थितानां पदार्थानामेव। ये चोत्थिता यतश्चोत्थितास्तेषां तत्रैव विलय इति याज्ञवल्क्य उवाच। ननु न संज्ञास्तीतिवचनेन क आशयः श्रुत्येति चेदुच्यते। अयं घटोयं पट इत्यादिसंज्ञा नास्ति। अथवा विनष्टानां कथंचिदप्यस्तित्वं न तिष्ठति॥

सा होवाच मैत्रेय्यत्रैव मा भगवानमू मुहन्त प्रेत्य सञ्ज्ञास्तीति॥ (२।४।१३)

सा च मैत्रेय्युवाच भगवान्मा मामत्रैवामूमुहत्। मां मोहं प्रापितवान्। ननु कुत्र याज्ञवल्क्योमूमुहन्मैत्रेयीमिति। उच्यते। न प्रेत्य संज्ञास्तीत्यत्र। श्रूयते प्रेत्य मृत्युं प्राप्य पुनर्जायन्ते जीवाः पुनश्च म्रियन्ते। कथं भवानाह न प्रेत्य संज्ञास्तीति॥

स होवाच। न वा अरेहं मोहं ब्रवीम्यलं वा अर इदं विज्ञानाय॥ (२।४।१३)

याज्ञवल्क्य उवाच मैत्रेयि नाहं मोहं मोहकारणमज्ञानमयं वा ब्रवीमि। सत्यमेव ब्रवीमीतिभावः। विज्ञानायेदमलम्। यदुच्यते मया तदेव विज्ञानं विशिष्टं ज्ञानम्। किं तदुक्तं भवता? ब्रह्म तं परादाद्योन्यत्रात्मनो ब्रह्म वेदेति। आत्मैव ब्रह्म। नात्मनः परं किञ्चिद्ब्रह्मशब्दवाच्यमस्तीति॥ (२।४।१३)

न ह्यात्मनोन्यद्ब्रह्मेति समर्थ्यते—

यत्र हि द्वैतमिव भवति तदितर इतरं जिघ्रति पश्यति शृणोत्यभिवदति मनुते विजानाति ॥(२।४।१४)

द्वैतं तु नास्त्येव। परन्तु यत्र द्वैतमिव भवति तत्तदेतरः कश्चनान्य इतरमन्यज्जिघ्रति। मत्तोन्यदिति मन्यते। एवं पश्यतीत्यादि योज्यम्॥

यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं मन्वीत तत्केन कं विजानीयात्॥ (२।४।१४)

यत्र तु यदातु अस्यात्मनः सर्वमात्मैवाभूत् स्वव्यतिरिक्तं किञ्चिदपि श्रेष्ठं वस्तु नास्तीति मतं तत्तदा केन कारणेन कं विजानीयात्। स्वस्माद्भिन्न एव परिज्ञायते। स्वस्माद्भिन्नं नास्त्येव। आत्मव्यतिरिक्तं किञ्चिदपि ज्ञेयं नास्तीति भावः॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

येनेदं सर्वं विजानाति तं केन विजानीयात्। विज्ञातारमरे केन विजानीयादिति ॥ (२।४।१४)

एवं स्थिते द्वैताभावे केन कं मन्वीत तत्केन कं विजानीयादित्युक्तम्। केनेत्यत्र साधनार्था तृतीया। केन साधनेनेत्यर्थः। विज्ञेय एव नास्ति कश्चनान्यस्तर्हि स्वस्मादन्यं कं कः केन साधनेन विजानीयात्? आश्चर्य-पूर्वकं द्विरुक्त्याह याज्ञवल्क्यो मैत्रेयीमरे, विज्ञातारं केन विजानीयात्। यदि स्यादन्यो विज्ञाता तर्हि सोपरं विज्ञातम् विजानीयत्। नास्ति तथा। ततो नैव विज्ञेयो विज्ञातेति प्रघट्टकार्थः॥

इति चतुर्थं ब्राह्मणम्

अथ पञ्चमं ब्राह्मणम्

यश्चायमस्यां पृथिव्यां तेजोमयोमृतमयः पुरुषो यश्चायमध्यात्मं शारीरस्तेजोमयोमृतमयः पुरुषोयमेव स योयमात्मेदममृतमिदं ब्रह्मदं सर्वम्॥ (२।५।१)

अस्यां पृथिव्यां योयं प्रतिशरीरं प्रतीयमानस्तेजो-मयोमृतमयः पुरुषोस्ति, यश्चायमध्यात्ममधिशरीरं शारीरः शरीरे भवस्तेजोमयोमृतमयः पुरुषः, अयमेव सः। अयमेव स इत्यनेन को विवक्षितः? आह। योयमात्मा। आत्मैवामृतममृतत्वेन प्रख्यातं वस्त्वात्मैव। इदमयमात्मैव ब्रह्म। इदमात्मैव सर्वम्। नन्वत्रेदं सर्वमित्यनेन किं विवक्षितम्? उच्यते। यदि-दममृतममरणधर्मं प्रोच्यते यदिदं च ब्रह्म बृहत्त्वव-दुच्यते, इदं सर्वमात्मैव। आत्मातिरिक्तं किञ्चिद-मरणधर्मबृहत्त्ववद्वस्तु च नास्तीति स्पष्टो भावः॥ (२।५।१)

तद्यथा रथनाभौ च रथनेमौ चाराः सर्वे समर्पिता एवमेवास्मिन्नात्मनि सर्वाणि भूतानि सर्वे देवाः सर्वे लोकाः सर्वे प्राणाः सर्वं एत आत्मानः समर्पिताः॥ (२।५।१५)

यावदात्मा तावदेव सर्वे पदार्था इत्याह दृष्टान्त-पूर्वकम्। यथा रथनाभौ रथचक्रयोर्मध्ये छिद्रविशेषे रथनेमौ रथस्य बाह्ये काष्ठदण्डेराः समर्पिताः सन्तो रथस्वास्थ्यं सम्पादयन्ति रथञ्च चालयन्ति। एवमेवा-स्मिन्नात्मनि सर्वभूतदेवलोकप्राणादयः समर्पिताः। रथनाभौ रथनेमौ च न स्युर्यद्यरा न स्याद्रथे गतिः। एवं यदि न स्युर्भूतदेवलोकाद्या न स्यादात्मनि प्रवृत्तिः। शरीरविशेषा यदि न स्युरात्मानोपि न स्युः। शरीर-धारा ह्यात्मानः। ननु "सर्वएत आत्मानः समर्पिताः" इति श्रुतिशेषस्य क आशयः? उच्चते। आत्मशब्दोत्र शरीरपरः। सर्वाण्येव शरीराणि समर्पितान्यात्मन्येव। आत्माधाराणि हि शरीराणीति तात्पर्यम्॥२।५।१५।

ब्रह्म रूपयितुमाह—

रूपं रूपं प्रतिरूपो बभूव तदस्य रूपं प्रतिचक्ष-णाय। इन्द्रो मायाभिः पुरुरूप ईयते युक्ता ह्यस्य हरयः शता दशेति॥ (२।५।१९)

इयं श्रुतिरविकलस्वरूपेणर्ग्वेदेप्युपलभ्यते। यद्यपी-यमुपनिषच्छुक्लयजुर्वेदीया तथापि तत्र नास्तीयम्। अस्मिन्मन्त्र इन्द्रशब्देन परमात्मा ब्रह्म वा गृह्यते। इदि परमैश्वर्ये। ऐश्वर्यस्य पारम्यंतु ब्रह्मण्येव स्यात्। एवं चायमिन्द्रो रूपं-रूपं यावद्रूपमित्यर्थः। प्रतिरूपो-बभूव सर्वरूपिपदार्थस्य यद्यद्रूपं यादृग्यादृग्वा रूपं तत्तुल्यरूपो बभूव। प्रतिचक्षणाय प्रतिवेदनाय व्यवहा-राय वा यत्किञ्चिदिहास्ति तत्सर्वंमस्यैव रूपम्। किं च स इन्द्रो मायाभिः स्वसङ्कल्परूपैः पुरुरूपो बहुरूपो मनुष्यगवाश्वादिरूपः सन् ईयते गच्छति प्राकट्यमे-तीत्यर्थः। अस्य हरयः शक्तयः। हरन्ति सर्वेषां मन इति हरयः। शता शतानि दश चेति। परःसहस्रा इत्यर्थः। ताश्च युक्ताः कार्यनिर्वहणसमर्था इत्यर्थः। अयं मन्त्रो ब्रह्मापि बोधयति जीवात्मानमपि। इन्द्र-परं ब्रह्मापि बोध्यते जीवोपि। इन्द्रियमिन्द्रलिङ्गमि-(अष्टा० ५।२।९३) त्यादिसूत्रे पाणिनिनेन्द्रलिङ्गमिति ब्रुवता जीव एवेन्द्र इति प्रतिबोधितम्। सर्वेषामेव वैयाकरणानां पाणिनीयानामत्रैकमत्यम्। एवं चास्मि-न्पक्षे मायाभिरित्यस्य कर्मभिरित्यर्थः। सामर्थ्यात्। यथा-कर्म रूपं गृह्णाति प्राप्नोति वा। अन्यत्सर्वं समानम्॥

अयं वै हरयोयं वै दश च सहस्राणि बहूनि चान-न्तानि च॥ (२।५।१९)

अयमात्मैव हरयः शक्तयः। अयं वै दशसहस्राणि बहूनि सहस्राणीत्यर्थः अनन्तानि चापि शरीरभेदात्।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

आत्मानोप्यनन्तास्तेषां शक्तयश्चाप्यनन्ता इति भावः। ये केप्यनन्ताः पदार्थाः प्राणिनोप्राणिनश्च दृश्यन्ते ते सर्वे स एव। तद्रूपा एवेत्यर्थः। सर्वेषां पदार्थानां शक्तयोपि स एव। न हि पदार्थेभ्यस्तद्गतशक्तिभ्यश्च ब्रह्म व्यभिचरति न वा ब्रह्मणस्ते व्यभिचरन्ति। एवं च पदार्थेभ्यो नातिरिक्त आत्मेति स्पष्टमायातम्॥

तदेतद्ब्रह्मापूर्वमनपरमनन्तरमबाह्यम्॥ (२।५।१९)

तदेतदुपरिनिर्दिष्टं ब्रह्म स्पष्टतया विवृणोति—अपूर्वमिति। नास्ति पूर्वं किञ्चिदपि यस्मात्तदपूर्वम्। अनपरं नास्त्यपरं पश्चात् किञ्चिदपि यस्य तदनपरम्। नान्तरमन्तरे किञ्चिद्यस्य तदनन्तरम्। अथवा नास्त्यन्तरं यस्य तदनन्तरम्। तस्य मध्ये किञ्चिन्नास्ति। अबाह्यं नास्ति बाह्यं किञ्चिद्यस्मात्तदबाह्यम् तस्माद्बहिरपि किञ्चिन्नास्ति। निरवयवत्वमात्मनः प्रतिपादयितुमपूर्वमनपरमनन्तरमबाह्यमितिविशेषणचतुष्टयम्॥

अयमात्मा ब्रह्म।

अयं प्रकान्त आत्मा ब्रह्म। नास्मादितरद्ब्रह्मेति।

सर्वानुभूः।

सर्वेषां पदार्थानां सुखदुःखादीनां धर्माणां वानुभवितापि स एवात्मा।

इत्यनुशासनम्॥ २।५। ९॥

अनुशासनमुपदेशः। सर्वसंशयसर्वदुःखविगमनायायमेवोपदेशः। अस्मादप्यनुशासनाज्जीवादन्यत्किञ्चिद्ब्रह्मास्तीति न बोधितं भवति॥ २।५।१९॥

॥ इति बृहदारण्यकोपनिषदि द्वितीयोध्यायः समाप्तः॥

बृहदारण्यकोपनिषदि

तृतीयाध्याये द्वितीयं ब्राह्मणम्

याज्ञवल्क्येति होवाच यत्रायं पुरुषो म्रियत उदस्मात्प्राणा क्रामन्त्याहो ३ नेति॥ ११॥

जरत्कारुगोत्रज ऋतभागपुत्र आर्तभागो याज्ञवल्क्यं पप्रच्छ—हे याज्ञवल्क्य, यत्र यस्मिन् शरीरे पुरुषो जीवो म्रियते तदास्माच्छरीरात्प्राणा उत्क्रामत्याहो नेति। अत्र पुरुषो म्रियत इत्युक्तं, न तु शरीरं म्रियत इत्युक्तम्। तेनावगम्यते देहनाशावध्येव जीवितम्। पुरुषोपि म्रियत एवेत्यार्तभागस्य मतम्॥

नेति होवाच याज्ञवल्क्योत्रैव समवनीयन्ते स उच्छ्वयत्यायत्याध्मातो मृतः शेते॥ ११॥

याज्ञवल्क्योस्य प्रश्नस्यार्तभागकृतस्योत्तरमाह नेति। याज्ञवल्क्य उवाच न प्राणा म्रियमाणान्मृताद्वा देहादुत्क्रामन्ति। किन्त्वत्रैव देह एव समवनीयन्ते प्रलीयन्ते। स पुरुषस्तु शरीरे प्राणसमवनयनानन्तरमुच्छ्वयत्युच्छूनो भवति, आध्मायति पूर्यते बाह्येन वायुनाभ्यन्तरस्थेनैवावशिष्टेन वायुना। आध्मातश्च सन् मृतः सञ्शेते स पुरुषः॥११॥

याज्ञवल्क्येति होवाच यत्रायं पुरुषो म्रियते किमेनं न जहातीति॥

पुनः पृच्छत्यार्तभागः, याज्ञवल्क्य यत्रायं पुरुषो म्रियते तत्रैनं पुरुषं किं न जहाति त्यजतीति। मृतस्य पुरुषस्य किमवशिष्यत इतिप्रश्नाशयः॥

नामेति। अनन्तं वै नाम अनन्ता विश्वेदेवाः। अनन्तमेव स तेन लोकं जयति॥१२॥

मृतेपि पुरुषे नामैनं पुरुषं न जहाति। नाम न म्रियत इत्यर्थः। नाम्नैव मृतोपि पुरुषो जीवत्येव। स्पष्टयति—अनन्तं वै नामेति। नाम्नोन्तो न भवति। नाम शब्दोत्र कीर्तेरुपलक्षकः। कीर्तिरेव कीर्तिमन्तं न

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

जहातीतिभावः। नाम्न आनन्त्येनैव विश्वेदेवाः सर्वे विद्वांसः सद्गुणशालिनोनन्ता अन्तरहिताः। नाम्ना ते ते महापुरुषा अद्यापि जीवन्त्येव। तेन नाम्नो ह्यानन्त्येन सोनन्तमेव लोकं जयतीति ॥ १२ ॥

पुरुषस्य साधनभूतानि यानीन्द्रियाण्यासँस्तानि पुरुषस्य मरणानन्तरं क्व गच्छन्तीति स्वयं व्याहृत्य 'प्राणा अत्रैव समवनीयन्त" इतियाज्ञवल्क्यवचनं विस्मृत्य प्राणो वातमप्येतीत्युत्क्रान्ते पृच्छति—

क्वायं तदा पुरुषो भवतीति ॥

यदा वागादीनि सर्वाणि वस्तूनि स्वकारणमपियन्ति तदायं पुरुषः क्व भवतीति प्रश्नोनर्थक एव। "पुरुषो मृतः शेते" इत्युपदेशमनादृत्य विस्मृत्य वा क्वायं तदा पुरुषो भवतीति पृच्छन्मूढ एवार्तभागः प्रतीयते। याज्ञवल्क्यस्तं हस्ते गृहीत्वा सजनस्थानं परिहृत्यैकान्तस्थानं नीत्वा तौ मन्त्रयांचक्रतुस्ते विचारयामासतुः। कर्मैव तत्र प्रशशंसतुः। कीदृशी प्रशंसेत्याह—

पुण्यो वै पुण्येन कर्मणा भवति पापः पापेनेति ॥

पुण्येन कर्मणा स पुरुषः पुण्यो भवति पापेन च पाप इति। अत्र कर्ममाहात्म्यमाह याज्ञवल्क्य इति। इदं प्रकरणमसम्बद्धमशुद्धमनौपनिषदं चेति विज्ञेयम्। पुरुषो मृतः। अग्निसाच्चक्रतो लोकैः। कथं पुनः पुण्यो वै पुण्येनेति संगच्छेतोपदेशः।

ततो ह जारत्कारव आर्तभाग उपरराम। १३॥

एतावतासम्बद्धेनैवोत्तरेण सन्तुष्ट आर्तभाग उपरराम उपरतोभवत् ॥१३॥

॥ इति श्री बृहदारण्यकोपनिषदि तृतीयाध्याये द्वितीयं ब्राह्मणम् ॥

अथ बृहदारण्यकोपनिषदि

तृतीयाध्याये चतुर्थं ब्राह्मणम्

अथ हैनमुषस्तश्चाक्रायणः पप्रच्छ याज्ञवल्क्येति होवाच यत्साक्षादपरोक्षाद्ब्रह्म य आत्मा सर्वान्तरस्तं मे व्याचक्ष्वेति ॥

चक्रस्य गोत्रापत्यमुषस्तनामा कश्चिद्याज्ञवल्क्यं पप्रच्छ पृष्टवान् प्रार्थयाञ्चक्र इत्यर्थः। किं प्रार्थितवान् ? यत्साक्षादपरोक्षादपरोक्षं ब्रह्म यश्च सर्वान्तर आत्मा तं मे मह्यं व्याचक्ष्वेत्युपदिशेति। अत्रापरोक्षादिति पञ्चम्यौपनिषदी प्रथमार्था। अपरोक्षमित्यस्य मनसा साक्षात्करणीयमित्यर्थः। अक्ष्णः परमिति परोक्षम्। न परोक्षमपरोक्षम् ॥

याज्ञवल्क्य आह—

एष त आत्मा सर्वान्तरः।

उषस्तेनापरोक्षं ब्रह्म पृष्टम्। तदेव विवृतं श्रुत्या य आत्मा सर्वान्तर इति। एवं च सर्वात्मना ब्रह्म न भिद्यते। अतएव ब्रह्म व्याचक्ष्वेति पृष्टोपि याज्ञवल्क्य एष त आत्मा सर्वान्तर इत्याहाङ्गुलिनिर्देशेन। अत्र तदस्तकारस्य सकाराभाव औपनिषदः। न च त इति षष्ठ्या अन्वादेश इतिवाच्यम्। यो म आत्मा तं व्याचक्ष्वेति प्रश्नस्वरूपाभावात्। मे व्याचक्ष्वेति श्रुतं मे इतिपदं तु चतुर्थीस्थानीयम्। याज्ञवल्क्य उपदिशति—एष स आत्मा सर्वान्तर इत्यङ्गुलिनिर्देशेन। अङ्गुलिनिर्देशेन किं दर्शयितुं शक्यम्? उषस्तस्य शरीरमेव। एवं च शरीरमेवात्मेतिभावः ईदृगात्मा सर्वान्तरः सर्वमन्तरयति सर्वं पृथक्करोति। अयं देवदत्तोसौ च यज्ञदत्त इति। देह एव सर्वेषां पृथक्करणस्य साधनम्। देवदत्तो मृतो यक्षदत्तश्च जीवतीति ज्ञानस्य साधनं देह एव। ततो देह एवात्मेत्युत्तरस्याशयः॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पुनः पृच्छत्युषस्तः—

कतमो याज्ञवल्क्य सर्वान्तरः ।

प्रश्नः स्पष्टः ।

याज्ञवल्क्य आह—

यः प्राणेन प्राणिति स त आत्मा सर्वान्तरः ।
योपानेनापानिति स त आत्मा सर्वान्तरः ।
यो व्यानेन व्यानिति स त आत्मा सर्वान्तरः ।
य उदानेनोदानिति स त आत्मा सर्वान्तरः ।
एष त आत्मा सर्वान्तरः ॥ १ ॥

अत्र सर्वत्र त इत्यधिकः पाठः । ममात्मोपदिशेति-प्रार्थनाया अभावात् । यः प्राणेन प्राणिति, अपानेनापानिति, व्यानेन व्यानिति, उदानेनोदानिति, स एवात्मा । प्राणेन देह एव प्राणिति, अपानेन देह एवापानिति, व्यानेन देह एव व्यानिति, उदानेन देह एवोदानिति, अतो देह एवात्मशब्दाभिलप्यः । इदानीमङ्गुलिनिर्देशेनाह एष त आत्मा तव शरीरं सर्वान्तरमन्यस्माद्देहात्पार्थक्यप्रदर्शयितृ । सर्वत्रैवात्मनो विशेषणं सर्वान्तर इति ॥ १ ॥

स होवाचोषस्तश्चाक्रायणः । यथा विब्रूयादसौ गौरसावश्व इत्येवमेवैतद्व्यपदिष्टं भवति । यदेव साक्षादपरोक्षाद्ब्रह्म य आत्मा सर्वान्तररतं मे व्याचक्ष्वेति । एष त आत्मा सर्वान्तरः । कतमो याज्ञवल्क्य सर्वान्तरः ॥

उषस्तः स चाक्रायणो याज्ञवल्क्यस्य हार्दमबुद्ध्वा पुनः पप्रच्छ भगवन् याज्ञवल्क्य यथा का गौः कश्चाश्व इति जिज्ञासमानाय कश्चनोपदिशेच्छृङ्गग्राहिकत्वासौ गौरसौ चाश्व इति । एवमेवैतदपि व्यपदिष्टं भवति भवतु । भवता तु प्राणेन प्राणितीत्यादिवचनेन यदुक्तं तन्न स्पष्टज्ञानाय भवति । अतो यत्साक्षादपरोक्षं ब्रह्म यो वात्मा सर्वान्तिरस्तं मे ब्रूहीति । याज्ञवल्क्य पुनस्तमेवोपदेशं कृतवान् । उषस्तश्च पुनस्तमेव प्रश्नं कृतवान् । किं च कतमो याज्ञवल्क्य इत्यत्र कतम इत्यनेनेदं ज्ञायते उषस्तो न ज्ञातुं समर्थोभवत्प्राणनशील आत्मा वापाननशील आत्मा वा व्याननशील आत्मा वोदाननशील आत्मेति । चतुर्विधेषूपदिष्टेष्वात्मा कः, चत्वार आत्मान एको वा । यद्येकस्तर्ह्येतेषु कतम इति प्रश्नस्य हार्दम् ॥

याज्ञवल्क्य उवाच —

न दृष्टेर्द्रष्टारं पश्येः । न श्रुतेः श्रोतारं शृणुयाः । न मतेर्मन्तारं मन्वीथाः । न विज्ञातेर्विज्ञातारं विजानीथाः ॥

दृष्टेः श्रुतेर्मतेर्विज्ञातेरित्यत्र तृतीयास्थाने पञ्चमी षष्ठी वा । द्रष्टारं दृष्ट्या न पश्येर्द्रष्टुं न शक्नुयाः । श्रुत्या श्रोतारं न शृणुयाः श्रोतुं न शक्नुयाः । मत्या मन्तारं न मन्वीथा मन्तुं न शक्नुयाः । विज्ञात्मा विज्ञातारं न विजानीथा विज्ञातुं न शक्नुयाः इति याज्ञवल्क्योपदेशः । अयमाशयोस्य । शरीरादन्यस्यात्मनोभावान्नास्ति कश्चनात्माद्रष्टा वा श्रोता वा मन्ता वा विज्ञाता वा । यदि स्यादृष्टिश्रुत्यादिभिरवश्यं सोनुभूतः स्यात् । न चानुभूयते । अतो नास्ति कश्चनैवंभूत आत्मा योविज्ञेयः स्यात् । अतः—

एष त आत्मा सर्वान्तरः । अतोन्यदार्तम् ॥

पुनरङ्गुलिनिर्देशेनाह याज्ञवल्क्य एष स आत्मा स च सर्वान्तर इति । ननु कथं भवन्मते स इत्यस्य स्थाने त इति सर्वत्र श्रूयते । उच्यते । यथा सर्वत्रापरोक्षमित्यस्य स्थाने परोक्षादिति पठ्यते तथैवात्रापि कथा वेदितव्या । निगमयति–अतोन्यदार्तम् । अतोस्मात्पुरो दृश्यमानाच्छरीरादन्यदात्मतत्त्वमार्तं तस्यान्वेषणं केवलं दुःखदमेवेति ।

ततो होषस्तश्चाक्रायण उपरराम ॥ २ ॥

उषस्तस्य मनःसन्तोषः समजनि न वेति न विज्ञायते । परं स उपरराम प्रश्नादुपरतोभवत् ॥ २ ॥

इति बृहदारण्यकोपनिषदि तृतीयाध्याये
चतुर्थं ब्राह्मणं

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अथ तृतीयाध्याये पञ्चमं ब्राह्मणम्

अथ हैनं कहोळः कौषीतकेयः पप्रच्छ। याज्ञवल्क्येति होवाच यदेव साक्षादपरोक्षाद्ब्रह्म आत्मा सर्वान्तरस्तं मे व्याचक्ष्वेति। एष त आत्मा सर्वान्तरः। कतमो याज्ञवल्क्य सर्वान्तरः॥

कुषीतकस्यापत्यभूतः कहोळ एनं याज्ञवल्क्यं पप्रच्छ। किं पप्रच्छेत्याह—यदेव साक्षादपरोक्षाद्ब्रह्म आत्मा सर्वान्तरस्तं मे मह्यं व्याचक्ष्वोपदिशेति। चतुर्थे ब्राह्मणे य एव प्रश्नः सम्पन्नः स एवात्र पुनरुत्थापितः। याज्ञवल्क्येनोत्तरमपि तदेव दत्तम्–एष त आत्मा सर्वान्तर इति। पुनश्चतुर्थब्राह्मण इवात्रापि स एव प्रश्नः कतमो याज्ञवल्क्य सर्वान्तर इति। अत्र यद्वक्तव्यं तत्र चतुर्थे ब्राह्मण उक्तमेव॥

याज्ञवल्क्य आह –

योऽशनायापिपासे शोकं मोहं जरां मृत्युमत्येति। एतं वै तमात्मानं विदित्वा ब्राह्मणा पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्युत्थायाथ भिक्षाचर्यं चरन्ति॥

एष त आत्मा सर्वान्तर इति याज्ञवल्क्योक्तमुत्तरं निशम्य पुनः कहोळेन पृष्टं कतमो याज्ञवल्क्य सर्वान्तर इति। तस्योत्तरमाह योऽशनायेति। अशनाया बुभुक्षा। पिपासा पातुमिच्छा। शोक इष्टवियोगजन्यं मर्माविद्दुःखम्। मोहोऽज्ञानं विषयप्रीतिर्वा। जरां वार्धकं मृत्युं देहवियोगम्। एतत्सर्वं योऽत्येत्यतीत्य गच्छति स सर्वान्तर इति। एतं तमात्मानं विदित्वा विज्ञाय ब्राह्मणा ब्रह्मज्ञानिनः पुत्रैषणाया वित्तैषणाया लोकैषणायाश्च व्युत्थायोपरज्य तदेषणात्रयम् अथानन्तरं भिक्षाचर्यं चरन्ति विद्वांसो देहयात्रानिर्वाहाय। अत्र किञ्चिद्विचारणीयम्। योऽशनापिपासादीनत्येति स सर्वान्तर इत्युक्तम् पूर्वम्। अतः परम् "एतं वै तमात्मानम्" इत्यादि श्रुतिः। अत्रैतच्छब्देन किं जिघृक्षितमिति प्रश्नः। योऽशनापिपासे इत्यादिवाक्यपतितयच्छब्दार्थोग्रहीतव्यः। तस्य यच्छब्दस्य च सम्बन्धस्ततः पूर्वं पठितेन सर्वान्तरशब्देन। एवं चात्रैतच्छब्देन सर्वान्तरो ग्रहीतव्यः। एवं च "एतं वै सर्वान्तरं तमात्मानं विदित्वा ब्राह्मणा व्युत्थाय भिक्षाचर्यं चरन्ति" इत्यन्वयः। एवं च सर्वान्तरशब्देन स्वात्मैव ग्रहीतव्यो न तु किञ्चिदन्यद्ब्रह्मादि। तं पूर्वोक्तमेतं देहरूपमात्मानं विदित्वेत्यादिरूपेण सम्बन्ध उन्नेयः। अशनादिषट्कं महादोषं योऽत्येति स आत्मैव न तु ब्रह्म। तस्यैतेषां दोषाणामप्राप्तत्वात्। ब्राह्मणा इत्यस्य ब्रह्मसम्बन्धित इत्यर्थः। येषां ब्रह्मविवित्सा त एव ब्राह्मणाः। ब्रह्म जानानोपि ब्राह्मणा वेदितव्याः। एतादृशो ब्रह्मदिदृक्षवो लोकाः पुत्रवित्तलोकैषणाः परित्यज्य वीतरागाः संन्यासिनो भवन्तीत्याशयः॥

तस्माद्ब्राह्मणः पाण्डित्यं निर्विद्य बाल्येन तिष्ठासेत्। बाल्यं च पाण्डित्यं च निर्विद्याथ मुनिः॥

पूर्वस्यां श्रुतौ ब्राह्मणधर्मं वेदयित्वेदानीमाह तस्मादिति। सर्वाभ्य एवैषणाभ्यो व्युत्थाय ब्राह्मणा भिक्षाचर्यं चरन्ति तस्माद्धेतोर्ब्राह्मणः पाण्डित्यं निर्विद्य पाण्डित्याद्ग्रन्थपाण्डित्यान्निर्विद्य निर्वेदं वैराग्यं प्राप्य बाल्येन तिष्ठासेत्। रागद्वेषमोहाहङ्कारादिशून्यो हि बालो भवति। बालस्वभावं स्वीकृत्य ब्रह्मलीनोनन्यमनस्कश्च तिष्ठेदित्यर्थः। सन्प्रत्यय इह नातीवावश्यकः। पाण्डित्यमितीह पञ्चम्यर्थकं पदम्। क्रमेण पाण्डित्यं बाल्यं पाण्डित्याद्बाल्याच्चापि निर्विद्य निर्वेदं प्राप्य, अथ मुनिर्भवति। बालस्य पाण्डित्यापेक्षया ब्रह्ममार्गे श्रेष्ठत्वात्तस्य पूर्वं पाठः। मुनिर्भवतीत्यस्य केवलमात्मचिन्तापरायण इत्यर्थः।

अमौनं मौनं च निर्विद्याथ ब्राह्मणः।

मुनिभवनात्पूर्वममौनावस्था। तामपि संगृह्योपदिशति अमौनान्मौनाच्च निर्विद्य निर्वेदमधिगत्य ब्राह्मणो भवेत्। ब्राह्मण इत्यस्य ब्रह्मनिष्ठ इत्यर्थः।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

भक्तिरितिसूत्रेण तस्येदमिति सूत्रेण वा पाणिनीयेन अण् ॥

स ब्राह्मणः केन स्याद् ॥

ब्राह्मणो भवेदित्युक्तं परं ब्राह्मणभवनोपयनं नोक्तमिति पृच्छति केनोपायेन स ब्राह्मणो भवेदिति ।

उत्तरमाह—

येन स्यात् तेनेदृश एव ॥

येन स्यात्तेनेदृश एव स्यात् । अयं भावः । ब्राह्मणत्वप्राप्तेर्नास्ति कश्चन नियतोपायः । परमिदं तु निश्चप्रचं पाण्डित्याद्बाल्यान्मुनिभावाच्चापि निर्वेदः प्राप्तव्यः । इदं प्रथमं सोपानं निर्वेदो नाम । निर्वेदानन्तरं भवीयेषु भावेष्वपरतिर्द्वितीयं सोपानम् । तदनन्तरं ब्रह्मसाक्षात्कार इत्यर्थः । तृतीयं सोपानं प्राप्तं नास्ति साधननिश्चयः । तृतीयस्मिन्नेव सोपाने स्यान्नाम ब्रह्मोपलब्धिर्नापि वा स्यात् । बलीयसा मनसा शक्यत एवोपलब्धुं ब्रह्मतत्त्वं तृतीयस्मिन्नेव सोपाने । निर्बलात्मा तत्र तदनवाप्य चतुर्थे वा पञ्चमे वा कस्मिंश्चित्सोपाने विदित ब्रह्मा स्यात् । येन केनाप्युपायेनात्मा ब्राह्मणः स्यात् । उपायो न निश्चित उपेयं तु निश्चितमेवेति ॥

अतोन्यदार्तम् ॥

अतोस्मादात्मलाभादन्यदतिरिक्तं सर्वमार्तं तुच्छमित्यर्थः ।

तत एतदुपदेशश्रवणानन्तरं सन्तुष्टोसन्तुष्टो वा कहोळ उपरराम उपरतो बभूव ॥

॥ इति श्रीबृहदारण्यकोपनिषदि तृतीयाध्याये पञ्चमं ब्राह्मणं ॥

अथ तृतीयाध्याये सप्तमं ब्राह्मणम्

याज्ञवल्क्यस्यान्तिकेरुणस्यापत्यमारुणिर्नाम्नोद्दालक एत्य पप्रच्छ—

याज्ञवल्क्य, अन्तर्यामिणं ब्रूहीति ॥ २ ॥

कोसावन्तर्यामी नाम्ना सर्वत्र प्रस्तुतस्तमहं न जाने । अतस्तमन्तर्यामिणं ब्रूहीति उपदिशेति ॥ २ ॥

यः पृथिव्यां तिष्ठन्पृथिव्या अन्तरो यं पृथिवी न वेद । यस्य पृथिवी शरीरम्, यः पृथिवीमन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः ॥ ३ ॥ योप्सु तिष्ठन्नद्भ्योन्तरोयमापो न विदुः । यस्यापः शरीरम् । योपोन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः ॥ ४ ॥ योग्नौ तिष्ठन्नग्नेरन्तरो यमग्निर्न वेद । यस्याग्निः शरीरम् । योग्निमन्तरो यमयति । एष त आत्मान्तर्याम्यमृतः ॥ ५ ॥ योन्तरिक्षे तिष्ठन्नन्तरिक्षादन्तरः । यमन्तरिक्षं न वेद । यस्यान्तरिक्षं शरीरम् । योन्तरिक्षमन्तरो यमयति । एष त आत्मान्तर्याम्यमृतः ॥ ६ ॥ यो वायौ तिष्ठन्वायोरन्तरः । यं वायुर्न वेद । यस्य वायुः शरीरम् । यो वायुमन्तरो यमयति । एष त आत्मान्तर्याम्यमृतः ॥ ७ ॥ यो दिवि तिष्ठन्दिवोन्तरः । यं द्यौर्न वेद । यस्य द्यौः शरीरम् । यो दिवमन्तरो यमयति । एष त आत्मान्तर्याम्यमृतः ॥ ८ ॥ य आदित्ये तिष्ठन्नादित्यादन्तरः । यमादित्यो न वेद । यस्यादित्यः शरीरम् । य आदित्यमन्तरो यमयति । एष त आत्मान्तर्याम्यमृतः ॥ ९ ॥ यो दिक्षु तिष्ठन्दिग्भ्योन्तरः । यं दिशो न विदुः । यस्य दिशः शरीरम् । यो दिशोन्तरो यमयति । एष त आत्मान्तर्याम्यमृतः ॥ १० ॥ यश्चन्द्रतारके तिष्ठंश्चन्द्रतारकादन्तरः । यं चन्द्रतारकं न वेद । यस्य चन्द्रतारकं शरीरम् । यश्चन्द्रतारकमन्तरो यमयति । एष त आत्मान्तर्याम्यमृतः ॥ ११ ॥ य आकाशे तिष्ठन्नाकाशादन्तरः । यमाकाशो न वेद । यस्याकाशः शरीरम् । य आकाशमन्तरो यमयति । एष त आत्मान्तर्याम्यमृतः ॥ १२ ॥ यस्तमसि तिष्ठंस्तमसोन्तरः । यं तमो न वेद । यस्य तमः

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शरीरम् । यस्तमोन्तरो यमयति । एष त आत्मान्तर्याम्यमृतः ॥ १३ ॥ यस्तेजसि तिष्ठंस्तेजसोन्तरः । यं तेजो न वेद । यस्य तेजः शरीरम् । यस्तेजोन्तरो यमयति । एष त आत्मान्तर्याम्यमृतः ॥ १४ ॥ इत्यधिदैवतम् ॥ अथाधिभूतम् ॥ यः सर्वेषु भूतेषु तिष्ठन्सर्वेभ्यो भूतेभ्योन्तरः । यं सर्वाणि भूतानि न विदुः । यस्य सर्वाणि भूतानि शरीरम् । यः सर्वाणि भूतान्यन्तरो यमयति । एष त आत्मान्तर्याम्यमृतः ॥ १५ ॥ यः प्राणे तिष्ठन्प्राणादन्तरः । यं प्राणो न वेद । यस्य प्राणः शरीरम् । यः प्राणमन्तरो यमयति । एष त आत्मान्तर्याम्यमृतः ॥ १६ ॥ यो वाचि तिष्ठन्वाचोन्तरः । यं वाङ् न वेद । यस्य वाक्छरीरम् । यो वाचमन्तरो यमयति । एष त आत्मान्तर्याम्यमृतः ॥ १७ ॥ यश्चक्षुषि तिष्ठँश्चक्षुषोन्तरः । यं चक्षुर्न वेद । यस्य चक्षुः शरीरम् । यश्चक्षुरन्तरो यमयति । एष त आत्मान्तर्याम्यमृतः ॥ १८ ॥ यः श्रोत्रे तिष्ठञ्छ्रोत्रादन्तरः । यं श्रोत्रं न वेद । यस्य श्रोत्रं शरीरम् । यः श्रोत्रमन्तरो यमयति । एष त आत्मान्तर्याम्यमृतः ॥ १९ ॥ यो मनसि तिष्ठन्मनसोन्तरः । यं मनो न वेद । यस्य मनः शरीरम् । यो मनोन्तरो यमयति । एष त आत्मान्तर्याम्यमृतः ॥ २० ॥ यस्त्वचि तिष्ठंस्त्वचोन्तरः । यं त्वङ् न वेद । यस्य त्वक्छरीरम् । यस्त्वचमन्तरो यमयति । एष त आत्मान्तर्याम्यमृतः ॥ २१ ॥ यो विज्ञाने तिष्ठन्विज्ञानादन्तरः । यं विज्ञानं न वेद । यस्य विज्ञानं शरीरम् । यो विज्ञानमन्तरो यमयति । एष त आत्मान्तर्याम्यमृतः ॥ २२ ॥ यो रेतसि तिष्ठन्रेतसोन्तरः । यं रेतो न वेद । यस्य रेतः शरीरम् । यो रेतोन्तरो यमयति । एष त आत्मान्तर्याम्यमृतः । अदृष्टो द्रष्टाश्रुतः श्रोतामतो मन्ताविज्ञातो विज्ञाता । नान्योतोस्ति द्रष्टा । नान्योतोस्ति श्रोता । नान्योतोस्ति मन्ता । नान्योतोस्ति विज्ञाता । एष त आत्मान्तर्याम्यमृतः । अतोन्यदार्तम् । ततो होद्दालक आरुणिरुपरराम ॥ २३ ॥

अन्तर्यामिणं लक्षयति । यः पृथिव्यामप्स्वन्तरिक्षे दिव्यादित्ये दिक्षु तारक आकाशे तमसि तेजसि सर्वेषु भूतेषु च तिष्ठन्नपि पृथिव्यादिभ्य एभ्योन्तरो व्यतिरिक्तः । यस्य पृथिवी शरीरं तथापि पृथिवीशरीरिणं यं पृथिवीं न वेद न जानाति । यश्चांतरः सन् पृथिवीं यमयति । एष त स आत्मान्तर्याम्यमृतः । उपनिषद्यस्यामात्मशब्देन ब्रह्मापि गृह्यते जीवोपि । क्वचिद्ब्रह्मप्रसङ्गाङ्गनिर्वाहकं भवति क्वचिच्च जीवः । उपनिषदां पन्था न सरलो वक्र एव । सर्वत्रैव ब्रह्मात्मप्रसंगे साम्प्रदायिकानां कलकल आकर्ण्यत एव । अत्र तु देहस्वाम्यात्मैव गृह्यते । ब्रह्मप्रकरणे ब्रह्मशब्दप्रयोगोपि दृश्यते । आत्मात्र लक्षणीयः । अत्राधिदैवतमधिभूतं प्रकृत्यान्तर्यामिस्वरूपं निरूपितम् । अनलसा हि भगवत्युपनिषत् । अतः क्रमेण सर्वाण्येव देहस्थितानि तत्त्वान्यात्मनिवासस्थानभूताति तदन्तःस्थितिं चात्मनो विस्तरेणाह । यः पृथिव्यामित्यादिना । यः पृथिव्यादीनि तत्वानि यमयति स एवात्मान्तर्यामी । देहस्थश्चेतन एवेदं भौतिकं शरीरं तत्स्थं सर्वतत्त्वं यमयति । यस्तद्यमयति स आत्मा । स एवान्तर्यामी । अन्तर्यमयतीत्येवात्मान्तर्यामीत्यप्युच्यते । सुगमा एवात्रत्याः सर्वाः श्रुतय इति नात्र व्याख्यानमपेक्ष्यते । अत्र न ब्रह्मणो वर्णनम् । जीवात्मन एव । जीवात्मैवामृतो द्रष्टा श्रोता मन्ता विज्ञाता । अतो जीवात्मनोन्यः कोपि नास्ति द्रष्टा श्रोता मन्ता विज्ञाता चेति । स एवादृष्टः सन्नपि द्रष्टान्येषाम् । अश्रुतोपि सन् स सर्वचसां श्रोता । ननु किमिदमुच्यतेश्रुतःश्रोतेति । श्रूयत एव सर्वत्र शास्त्रेषु । सत्यम् । यथा चक्षुषा किञ्चिद्दृष्टा हरितमिदं रक्तमिदमिति निश्चीयते न तथा श्रोत्रेण श्रुत्वा स निश्चीयते । श्रोत्रेण केवलं शब्दः श्रूयते । देवदत्तेन पुनःपुनरुच्चारितं शब्दराशिं श्रुत्वाभिज्ञायतेयं देवदत्तशब्द इति । नेत्थमात्मात्मशब्देन निश्चीयत इति । नन्वत्राधिदैवतप्रकरणेप्सु तिष्ठन्नग्नौ तिष्ठन्नन्तरिक्षे तिष्ठन्वायौ तिष्ठन्नित्याद्युक्तं तत्कथमात्मनि संगच्छेत तस्याण्डपरिमाणत्वादिति । सत्यम् । महत्परिमाणमेवात्मन उपनिषदां नय इति । ननु नेदं सत्यमण्डरेष इत्युक्त्याण्डत्वमेवात्मन इति । नेदं सत्यम् तत्राण्डशब्दः सूक्ष्मार्थकः । आत्मनः सूक्ष्मताप्रदर्शनायैव तत्राण्डशब्दप्रयोगो न त्वण्डपरिमाणत्वप्रतिपादनाय । नन्वात्मनो महत्वे गत्यागत्यादीनां का गतिरिति चेत् या गतिः परमेश्वरावतारवादिनां भवति परमेश्वरस्य सर्वव्यापकस्याचलस्यागतेश्च सैवात्मनोपि स्यात् । न तत्र काचित्क्षतिः । अत इयं श्रुतिनिर्झरिणी जीवात्मस्वरूपनिदर्शन्येव । आत्मनोन्यत्सर्वमार्तमिवाकिञ्चित्करमेवेति निशम्य स उद्दालक उपरराम ॥ ३।२३॥

इति श्रीबृहदारण्यकोपनिषदि तृतीयाध्याये सप्तमं ब्राह्मणं

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अथ तृतीयाध्यायेऽष्टमं ब्राह्मणम्

अथ ह वाचक्नव्युवाच ब्राह्मणा भगवन्तो हन्ताहमिमं द्वौ प्रश्नौ प्रक्ष्यामि। तौ चेन्मे वक्ष्यति न जातु युष्माकमिमं कश्चिद्ब्रह्मोद्यं जेतेति। पृच्छ गार्गीति ॥ १ ॥

व्याचक्नव्युवाच, हे भगवन्तो ब्राह्मणा अहमिमं याज्ञवल्क्यं द्वौ प्रश्नौ प्रक्ष्यामि। अयं तौचेन्मम प्रश्नौ वक्ष्यत्युत्तरयिष्यति तदेमं युष्माकं मध्ये ब्रह्मोद्यं ब्रह्मवादं प्रति कोपि न जातु जेतास्ति। ब्राह्मणा आहुः पृच्छ गार्गीति ॥ १ ॥

सा होवाच। अहं वै त्वा याज्ञवल्क्य यथा काश्यो वा वैदेहो वोग्रपुत्र उज्ज्यं धनुरधिज्यं कृत्वा द्वौ बाणवन्तौ सपत्नातिव्याधिनौ हस्ते कृत्वोपोत्तिष्ठेदेवमेवाहं त्वा द्वाभ्यां प्रश्नाभ्यामुपोदस्थाम्। तौ मे ब्रूहीति ॥ २ ॥

प्रश्नकरणोद्यता वाचक्नवी न नम्रा न वा सुशीला न वोपदेश्येति प्रश्नवाक्येन प्रतीयते। अनेन प्रश्नेन प्रश्नकर्त्र्या हृदये महानभिमान इति स्पष्टमेव। यथा कश्चित्परीक्षकः परीक्ष्यान् पृच्छति तथैवेयं पप्रच्छ। तथाप्याह याज्ञवल्क्यः—

पृच्छ गार्गीति। सा होवाच यदूर्ध्वं याज्ञवल्क्य दिवो यदवाक्पृथिव्या यदन्तरा द्यावापृथिवी इमे यद्भूतं च भवच्च भविष्यच्चेत्याचक्षते कस्मिंस्तदोतं प्रोतं चेति ॥ ३ ॥

याज्ञवल्क्येनानुज्ञता वाचक्नव्याह, याज्ञवल्क्य, दिवो द्युलोकाद्यदूर्ध्वमस्ति पृथिव्याश्च यदवागधोस्ति यच्च द्यावापृथिवी द्यावपृथिव्योरन्तरा मध्येस्ति यद्भूतमस्ति यच्च भवदस्ति यच्च भविष्यदस्ति, एतत्सर्वं विद्वांसो यत्किञ्चिदाचक्षते तत्सर्वं कस्मिन्नोतं च प्रोतं चास्तीति ॥ ३ ॥

स होवाच यदूर्ध्वं गार्गि दिवो यदवाक्पृथिव्या यदन्तरा द्यावापृथिवी इमें यद्भूतं च भवच्च भविष्यच्चेत्याचक्षत आकाशे तदोतं च प्रोतं चेति ॥ ४ ॥

स होवाच याज्ञवल्क्य उवाच। त्वया येषामधिष्ठानं पृष्टं तत्सर्वमाकाशे स्थितमिति। ओतं च प्रोतं चेत्येतयोरयमेवाशयः ॥ ४ ॥

सा होवाच नमस्तेस्तु याज्ञवल्क्य यो म एतं व्यवोचोपरस्मै धारयस्वेति। पृच्छ गार्गीति ॥ ५ ॥

पूर्वोक्तमुत्तरं श्रुत्वा सोवाच याज्ञवल्क्य ते नमोस्तु। किमर्थमेष नमस्कार इत्याह–यस्त्वमेतं मे प्रश्नं व्यवोच विशेषेणोक्तवान्। अथवा विरत्र निरर्थकः। अवोच इत्येवालम्। इदानीमपरस्मै प्रश्नाय धारयस्व द्वितीयं प्रश्नं पृच्छामि सज्जो भवेत्यर्थः। याज्ञवल्क्य आह गार्गि पृच्छेति ॥ ५ ॥

सा होवाच। कस्मिन्नु खल्वाकाश ओतश्च प्रोतश्चेति ॥ ७ ॥

न तिरोहितार्था श्रुतिः ॥ ७ ॥

स होवाच। एतद्वैतदक्षरं गार्गि ब्राह्मणा अभिवदन्त्यस्थूलमनण्वह्रस्वमदीर्घमलोहितमस्नेहमच्छायमतयोवाय्वताकाशमसङ्गमरसमगन्धमचक्षुष्कमश्रोत्रमवागमनोतेजस्कमप्राणममुखममात्रमनन्तरमबाह्यम्। न तदश्नाति किञ्चन न तदश्नाति कश्चन ॥ ८ ॥

एतस्मिन्नु खल्वक्षरे गार्ग्याकाश ओतश्च प्रोतश्चेत्युत्तरमस्य प्रश्नस्यैकादशे खण्डे द्रष्टव्यम्। कीदृशं तदक्षरमित्याह ब्राह्मणा ब्रह्मज्ञानिनो ब्रह्मस्वरूपं यदभिवदन्ति तदित्थम्–अस्थूलम् अनणु अह्रस्वम् अदीर्घम् इत्येतैर्विशेषणैः शरीरनिषेधः क्रियते। अलोहितम् इत्यनेन शरीररङ्गः प्रतिषिध्यते। अस्नेह इत्यनेनाब्धर्मो निषिध्यते। अस्नेह इत्युपलक्षणम् सर्वेषां प्राकृतद्रव्याणां निषेधो वेदितव्यः। छाया प्रतिबिम्बम्।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अच्छायं प्रतिबिम्बरहितम्। अतमो नास्ति तत्र तमः। प्रकाशस्वरूपत्वात्तस्य। अवायु आनाकाशम्। आभ्यां पञ्चभूतनिषेधः क्रियते। असङ्गम् इत्यनेन पञ्चभूतनिषेधस्य दाढर्यं निवेद्यते। अरसम् अगन्धम् अचक्षुष्कम् अश्रोत्रम् अवाक् अमनः अतेजस्कम् इत्येतैर्विशेषणैः रूपरसादि सम्बन्धो निवर्त्यते। अप्राणम् अमुखम् इत्याभ्यां शरीरित्वं निषिध्यते। अमात्रम् नास्ति मात्रा यस्य तत्। मात्रा मानम्। एवं चेत्यनेन परिमाणनिषेधः। अनन्तरं शरीरित्वभावादन्तरत्वाभावः। अबाह्यम् अशरीरत्वादेवाबाह्यत्वम्। सति शरीरे ह्यन्तरबाह्यविचारः। शरीरासम्भवादेवाशरीरित्वान्न तत्किञ्चनाम्नाति। न शरीरि तत एव कश्चन तदपि ब्रह्माणि नाम्नाति। औपनिषदं ब्रह्माशरीरीति स्पष्टमनया श्रुत्या श्राव्यते। एवं चावतारवादो नौपनिषदः॥८॥

एतस्य वा अक्षरस्य प्रशासने गार्गि सूर्याचन्द्रमसौ विधृतौ तिष्ठतः। एतस्य वा अक्षरस्य प्रशासने गार्गि द्यावापृथिव्यौ विधृतौ तिष्ठतः। एतस्य वाक्षरस्य प्रशासने निमेषा। गार्गि निमेषा मुहूर्ता अहोरात्राण्यर्धमासा मासा ऋतवः संवत्सरा इति विधृतास्तिष्ठन्ति।

हे गार्गि, एतस्यैवाक्षरस्याविनाशिनः प्रशासने वर्तमानावितिशेषः। सूर्याचंद्रमसौ विधृतौ तिष्ठतः। द्यावापृथिव्यावपि तथैव तिष्ठतः। निमेषा मुहूर्ता अहोरात्राणि अर्धमासाः पक्षा मासा ऋतवः संवत्सरा इत्येते सर्वे विधृतास्तिष्ठन्ति। अनलसाः श्रुतयः सर्वेषामावश्यकानामनावश्यकानां च नामानि परिगणयन्त्यो न श्राम्यन्ति। अहोरात्राणीति प्रयोग औपनिषदः। प्रशासन इति सर्वत्र ग्रहीतव्यम्।

एतस्य वा अक्षरस्य प्रशासने गार्गि प्राच्यो नद्यः स्पन्दन्ते श्वेतेभ्यः पर्वतेभ्यः। प्रतीच्योन्या यां यां च दिशमनु॥

हे गार्गि याः प्राच्यः प्राङ्मुखप्रवाहा नद्यो गङ्गाद्या सन्ति ता अप्येतस्यैव प्रशासने वर्तमानाः सत्यः श्वेतेभ्यः पर्वतेभ्यो हिमालयादिभ्यः स्पन्दन्ते प्रवहन्ति। प्रतीच्योन्या उदीच्यश्च प्रत्यङ्मुखा उदङ्मुखाश्च नद्यो यां यां दिशमनु यां यां दिशं गच्छन्ति ताः सर्वा अप्येतस्यै प्रशासने स्थिताः। ननु प्रतीच्यो नद्य प्राङ्मुखा एव गच्छन्ति, उदीच्य उदङ्मुखा एव गच्छन्ति किमर्थं तर्हि "यां यां च दिशमनु" इत्युक्तम्। बाढमुक्तम्। प्राङ्मुखा नद्यः प्राच्येव गच्छन्ति प्रत्यङ्मुखा प्रतीच्येव गच्छत्युदङ्मुखाश्च उदीच्येव गच्छन्तीति न नियमः। पर्वतेषु धावन्त्यस्ताः क्वचित् पूर्वमुखाः क्वचित्प्रत्यङ्मुखाः क्वचिदुदङ्मुखाश्चापि ता भवन्तीति सुष्ठूक्तं यां यां च दिशमन्विति॥

एतस्य वाक्षरस्य प्रशासने गार्गि ददतो मनुष्याः प्रशंसन्ति यजमानं देवा दर्वीं पितरोन्वायत्ताः॥ ९॥

अन्वायत्ता अधीनाः। अन्यत्स्पष्टम्॥ ९॥

यो वा ह एतदक्षरं गार्ग्यविदित्वास्मिल्लोके जुहोति यजते तपस्तप्यते बहूनि वर्षसहस्राण्यन्तवदेवास्य तद्भवतीति। यो वा एतदक्षरं गार्ग्यविदित्वास्माल्लोकात्प्रैति स कृपणः। अथ एतदक्षरं गार्गि विदित्वास्माल्लोकात्प्रैति स ब्राह्मणः॥ १०॥

यज्ञादीनां कर्मणां नैरर्थक्यं बोधयितुं प्रवृत्तेयं महासाहससम्पन्ना भगवती श्रुतिर्महाकण्ठरवेणोपदिशति योक्षरं ब्रह्माविज्ञाय जुहोति यजते बहूनि वर्षसहस्राणि तपस्तप्यते तपति, अस्य तस्येतिभावः। तद्धवनयजनतपआदिकमन्तवदेव विनाश्येव भवति। किंच यो यागादिभिरेव जीवनं समापयति न चावगच्छति तदक्षरं ब्रह्म तदनवगच्छन्नेव यः प्रैति म्रियते स कृपणो दीनः शोचनीय इति यावत्। एतेन यागादीनां पारलौकिके पथि वर्तमानस्य ज्ञानिनो नैरर्थ्यकं बोधितम्। न हि यागादीनि कर्माणि ब्रह्मावगमयितुं समर्थानीति भावः। अथ य एतदक्षरं ब्रह्म विदित्वास्याल्लोका प्रैति स ब्राह्मणो ब्रह्मैव ब्राह्मणः। ब्राह्मणो भवति ब्रह्मैव भवतीतिभावः। नन्वत्र "स ब्राह्मणः" इत्येवमुक्तं न च भवतीत्यपि। तर्हि किं भवतीत्यध्याहार्यं नवेति? उच्यते। यदि नास्ति कर्मकृज्जीवब्रह्मणोर्भेदस्तर्हि नास्ति भवति ना कार्यम्। यद्युभयोरस्त्येव भेदस्तर्हि भवतीत्यध्याहार्यमेव। किंच तदा ब्राह्मण इत्यत्र "तस्येदम्" इत्यण्। यत्तदोर्निर्देशादस्त्येवोभयोर्भेदे इत्येवात्र प्रतीयते। एवं च भवतीत्यध्याहारो न्याय्य एव। तथा च स ब्राह्मणो भवतीत्यस्य ब्रह्मसमीपवर्ती भवति। परन्तु ब्रह्मणो व्यापकत्वात्तस्य

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सामीप्यं नित्यसिद्धमिति मतं चेत्तदा तद्ब्रह्मस्वरूपं भवतीत्येव व्याख्येयम्। कृपणसाहचर्याद् ब्राह्मण इत्यस्य ब्रह्मत्येवार्थोन्याय्यः। स्वार्थेण्। ब्रह्मैव ब्राह्मणः। स्वार्थिकाः प्रत्यया लिङ्गादीनतिवर्तन्ते ॥ १० ॥

तद्वा एतदक्षरं गार्ग्यदृष्टं द्रष्टृश्रुतं श्रोत्रमतं मन्त्र-विज्ञातं विज्ञातृ। नान्यदतोस्ति द्रष्टृ नान्यदतोस्ति श्रोतृ नान्यदतोस्ति मन्तृ नान्यदोस्ति विज्ञातृ। एतस्मिन्नु खल्वक्षरे गार्ग्याकाश ओतश्च प्रोतश्चेति ॥ ११ ॥

हे गार्गि, तदेतदक्षरं ब्रह्म अदृष्टं केनाप्यन्येन परं स्वयं तु दृष्टं सर्वेषाम्। श्रोत्राविषयत्वान्त केनापि श्रुतमतोऽश्रुतं परन्तु तत्स्वयं श्रोतृ सर्वेषां शब्दानाम्। तदमतं न केनापि मतं मननविषयीकृतम्। परन्तु तन्मन्तृ सर्वाण्येवं वस्तूनि मननविषयीकरोति। केनापि तदविज्ञातमपि स्वयं विज्ञातृ सर्वेषां वस्तूनां ज्ञातृ। अत्रादृष्टाश्रुतामताविज्ञातादिशब्दराशीनां प्रयोजनं तु ब्रह्मण इन्द्रियातीतत्वबोधन एव। अन्तोन्यस्मादन्यत् किमपि द्रष्टृ श्रोतृ मन्तृ विज्ञातृ चेति। अत्र तु जीव-ब्रह्मणोरभेद एवोक्तो जीवस्यास्तित्वाभाव एव वोक्तः। हे गार्गी, एतस्मिन्नेवाक्षरे त्वया पृष्ट आकाश ओतश्च प्रोतश्चेति। सप्तमं ब्राह्मणमनुसरति ब्राह्मण-मेतत् ॥ ११ ॥

सा होवाच ब्राह्मणा भगवन्तस्तदेव बहु मन्येध्वं यदस्मान्नमस्कारेण मुच्येध्वम्।

एतत्सर्वं श्रुत्वा सा गार्ग्युवाच हे ब्राह्मणा भगवन्त-स्तदेव बहु मन्येध्वं यदस्मान्महाविदुषो नमस्कारेण मुच्येध्वम्। याज्ञवल्क्योयं महान् ब्रह्मवित्तत्ववेत्ता च नास्त्यस्य कश्चिद्विजेता। अतो नमस्कारं कृत्वा मुक्ता भवन्तु दूरं पलायन्ताम्। प्रतिष्ठाभङ्गो न स्यादेतदेव बहु मन्तव्यम्। अस्य पराजिगीषया समायाता भवन्तो-पसरन्त्वितः शनैरिति तस्या आशयः ॥

एतदेव स्पष्टयति—

न वै जातु युष्माकमिमं कश्चिद्ब्रह्मोद्यं जेतेति। ततो ह वाचक्नव्युपरराम॥ १२ ॥

सा होवाच युष्माकं मध्ये न वै कश्चिज्जातु कदाचिदिमं ब्रह्मविदं याज्ञवल्क्यं ब्रह्मोद्यं ब्रह्मवदनं प्रति जेतेति। ब्रह्मोद्यं प्रत्यद्वितीयोयं वक्तेति। ततो वाचक्नव्युपरराम। ब्राह्मणा अप्युपरेमुरेवेतिभावः ॥

इति बृहदारण्यकोपनिषदि तृतीयाध्याये अष्टमं ब्राह्मणम्

●

अथ तृतीयाध्याये नवमं ब्राह्मणम्

शकलस्यापत्यं शाकल्यो विदग्धो याज्ञवल्क्यं पप्रच्छ—

कति देवा याज्ञवल्क्येति ॥ १ ॥

हे याज्ञवल्क्य देवाः कति कियत्संख्याकाः सन्तीति ॥ १ ॥

त्रयस्त्रिंशत्त्वेव देवा इति।

याज्ञवल्क्य उवाच—त्रयस्त्रिंशत्वेव देवा इति।

शाकल्यः पप्रच्छ—

कतमे ते त्रयस्त्रिंशदिति।

अनेन प्रश्नेन शाकल्यस्त्रयस्त्रिंशतो देवानां नामा-जिज्ञासत।

याज्ञवल्क्य उवाच—

अष्टौ वसव एकादश रुद्रा द्वादशादित्यास्त एक-त्रिंशदिन्द्रश्चैव प्रजापतिश्च त्रयस्त्रिंशाविति ॥ २ ॥

अष्टौ वसवः एकादश रुद्राः। द्वादशादित्याः। त एत एकत्रिंशत्। त्रयस्त्रिंशतः पूरणाविन्द्रः प्रजापति-श्चेति। एवं त्रयस्त्रिंशद्देवा इति ॥ २ ॥

कतमे वसवः।

कतम इत्यौपनिषदः प्रयोगः। के ते वसव इति प्रश्नाशयः।

अग्निश्च पृथिवी च वायुश्चान्तरिक्षं चादित्यश्च द्यौश्च चन्द्रमाश्च नक्षत्राणि चैते वसवः ॥

स्पष्टम् ॥

कथमेते वसव उच्यन्ते? आह—

एतेषु हीदं वसु सर्वं हितमिति तस्माद्वसव इति ॥ ३ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

एतेषु सर्वमिदं वसु धनं हितं निहितमित्येतस्मादेते वसव इति। यद्यान्यादयो न स्युः संसाक्रमोवरुद्ध्येत। एतैर्वसुभिः प्राणिनां जीवननिर्वाहो भवति। एवं चैते सर्वं वासयन्ति तस्माद्वसव इति ॥ ३ ॥

कतमे रुद्राः ॥

कियन्तो रुद्राः के वा रुद्रा इति प्रश्नः।

अस्योत्तरम्—

दशेमे पुरुषे प्राणा आत्मैकादशः ॥

पुरुषे पुरुषशरीरे वा दशेमे प्राणा दशेन्द्रियाणि। प्राणशब्दोत्रेन्द्रियाण्याह। एकादश आत्मा। आत्मशब्दश्च मनोवाचकोत्र। पञ्च कर्मेन्द्रियाणि पञ्च ज्ञानेन्द्रियाणि मनश्चेति मिलित्वैकादशसंख्याकानीन्द्रियाण्येव रुद्रशब्दाभिधेयानि ॥

कस्मादेतानि रुद्रशब्दाभिधेयानीत्याह—

ते यदास्माच्छरीरान्मर्त्यादुत्क्रामन्त्यथ रोदयन्ति। तद्यद्रोदयन्ति तस्माद्रुद्रा इति ॥ ४ ॥

ते रुद्रास्तानीन्द्रियाणि यदास्माच्छरीरान्मर्त्यादस्मिञ्छरीरे उपभोग्यानां कर्मणामुपक्षय उत्क्रामन्ति तदा सम्बन्धिनो रोदयन्ति तस्मात्तानि रुद्रा इत्युच्यन्त इति ॥ ४ ॥

कतम आदित्या इति।

के त आदित्या उच्यन्ते ?

द्वादश वै मासाः संवत्सरस्यैत आदित्याः। एते हीदं सर्वमाददाना यन्ति।

संवत्सरस्य द्वादश मासा एवादित्याः।

कथमेत आदित्या उच्यन्त इत्याह—

ते यदिदं सर्वमाददाना यन्ति तस्मादादित्या इति ॥ ५ ॥

यद्यस्मात्ते सर्वप्राणिनामायुरादिकमाददाना गृह्णन्तो यन्ति गच्छन्ति तस्मादित्या इति। आ-दा-इ (इण् गतौ) इत्येषां संघातेनादित्यशब्दं निष्पाद्येयमुक्तिरिति विज्ञेयम् ॥ ५ ॥

कतम इन्द्रः कतमः प्रजापतिरिति। स्तनयित्नुरेवेन्द्रो यज्ञः प्रजापतिरिति। कतमः स्तनयित्नुरिति। अशनिरिति। कतमो यज्ञ इति। पशव इति ॥ ६ ॥

स्तनयित्नुरिन्द्रः स चाशनिः। अशनिर्वज्रम्। पशुसाध्यत्वाद् यज्ञस्य पशुत्वमिति ॥ ६ ॥

कतमे षडिति। अग्निश्च पृथिवी च वायुश्चान्तरिक्षं चादित्यश्च द्यौश्चैते षट्। एते हीदं सर्वं षडिति ॥ ७ ॥

स्पष्टम्।

कतमे ते त्रयो देवा इति। इम एव त्रयो लोकाः। एष हीमे सर्वे देवा इति। कतमौ तौ द्वौ देवाविति। अन्नं चैव प्राणश्चेति; कतमोध्यर्धं इति। योयं पवत इति ॥ ८ ॥

अध्यर्धं इति। अध्यार्ध्नोतीत्यध्यर्धो वायुः ॥८॥

तदाहुर्यदमेक इवैव पवतेथ कथमध्यर्धं इति। यस्मिन्निदं सर्वमध्यार्ध्नोत्तेनाध्यर्धं इति।

तदाहुस्तत्राहुस्तत्र चोदयन्ति वायोरेकत्वात्कथं तस्याध्यर्धत्वमिति ? उत्तरयति—यस्मादिदं सर्वं सत्येव वायावध्यर्ध्नोति अधिकां वृद्धिं प्राप्नोति तस्माद्वायोरध्यर्धत्वमिति। ऋधु वृद्धौ ॥

कतम एको देव इति। प्राण इति। स ब्रह्म त्यदित्याचक्षते ॥ ९ ॥

प्राण एव देवः। स एव प्राणदेवो ब्रह्मत्याचक्ष्यते। त्यदित्यप्याचक्ष्यते। त्यच्छब्देनापि प्राणशब्देनापि ब्रह्मैवोच्यते। प्राण एव ब्रह्मेति स्पष्टोर्थः ॥ ९ ॥

पृथिव्येव यस्यायतनम्। अग्निर्लोकः। मनो ज्योतिः। यो वै तं पुरुषं विद्यात्सर्वस्यात्मनः परायणं स वै वेदिता स्यात्। याज्ञवल्क्य वेद वा अहं तं पुरुषं सर्वस्यात्मनः परायणं यमात्थ। य एवायं शारीरः पुरुषः स एषः ॥

आयतनमाश्रयो निवासस्थानं वा। लोकंते पश्यत्यनेनेति लोकः। स चाग्निः। अग्निनैव सर्वेवलोकन्ते वस्तुमात्रम्। ज्योतिः प्रकाशः। मनसा सर्वं विदितं विचारितं च भवति पदार्थस्वरूपयाथार्थ्यमवगतं भवतीति मनो ज्योतिः। शारीरः पुरुषः शरीरावस्थितः

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पुरुष एव सः। अथवा शरीरमेव शारीरः। स्वार्थिकाः प्रत्यया लिङ्गवचनादीनि न सम्मानयन्ति।

वदैव शाकल्य तस्य का देवतेति।

शाकल्य यदि त्वं तं पुरुषं जानासि तर्हि वद तस्य देवता का? अत्र देवताशब्देन धारयितेत्याह।

अमृतमिति होवाच ॥ १० ॥

अत्रामृतशब्देन शरीरधारको रस उच्यते ॥ १० ॥

काम एव यस्यायतनम्। हृदयं लोकः। मनो ज्योतिः। यो वै तं पुरुषं विद्यात् सर्वस्यात्मनः परायणं स वै वेदिता स्यात्। याज्ञवल्क्य वेद वा अहं तं सर्वस्यात्मनः परायणं यमात्थ। य एवायं काममयः पुरुषः स एषः। वदैव शाकल्य तस्य का देवतेति। स्त्रिय इति होवाच ॥ ११ ॥ रूपाण्येव यस्यायतनम्। चक्षुर्लोकः। मनो ज्योतिः। यो वै……… यमात्थ। य एवासावादित्ये पुरुषः स एषः। वदैव……… देवतेति। सत्यमिति होवाच ॥ १२ ॥ आकाश एव……। य एवायं श्रौत्रः प्रतिश्रुत्कः पुरुषः। स एष वदैव शाकल्य तस्य का देवतेति। दिश इति होवाच ॥ १३ ॥ तम एव यस्यायतनम्……। य एवायं छायामयः पुरुषः। स एष वदैव शाकल्य तस्य का देवतेति। मृत्युरिति होवाच ॥ १४ ॥ रूपाण्येव यस्यायतनम्………। य एवायमादर्शे पुरुषः। स एष वदैव शाकल्य तस्य का देवतेति। असुरिति होवाच ॥ १५ ॥ अप एव यस्यायतनम्………। य एवायमप्सु पुरुषः स एषः। वदैव शाकल्य तस्य का देवतेति। वरुण इति होवाच ॥ १६ ॥ रेत एव यस्यायतनम्……… । य एवायं पुत्रमयः पुरुषः स एषः। वदैव शाकल्य तस्य का देवतेति। प्रजापतिरिति होवाच ॥ १७ ॥

तत्त्वशून्यत्वादग्रिमाः श्रुतयः परित्यक्ताः ॥ १७ ॥

कस्मिन्नुत्वं चात्मा च प्रतिष्ठितौ स्थः।

अत्र प्रश्नवाक्य आत्मशब्देन हृदयमत्र ग्राह्यम् ॥

स एष नेति नेत्यात्मा।

याज्ञवल्क्य उपदिशति—स एष आत्मेति। कः? नेति नेतीति निर्दिष्टः। यस्येति नास्ति। अनन्त इत्यर्थः। इयत्ताशून्य इति परमार्थः।

आत्मानं विशिनिष्टि—

अगृह्यो न हि गृह्यते।

स चात्मागृह्यो गृहीतुमशक्यः अतएव न गृह्यते केनापीन्द्रियेण।

अशीर्यो न हि शीर्यते।

अशीर्णा विशरणायोग्यः अतएव न हि शीर्यते सः।

असङ्गो न हि सज्जते।

सोसङ्गोस्ति सङ्गरहितोस्तीति न कुत्रापि न वा केनापि सज्जते सक्तो भवति।

असितो न व्यथते न रिष्यति।

असितोबद्धः। षिञ् बन्धने। क्तः। स बन्धनशून्योस्त्यत एव न व्यथते न दुःखितो भवति न च रिष्यते न हिंस्यते। रिष् हिंसायाम्। न पीड्यत इति भावः। बद्ध एव पीड्यते।

अथ होवाच ब्राह्मणा भगवन्तो यो वः कामयते स मा पृच्छतु। सर्वे वा मा पृच्छत। । यो वः कामयते तं वः पृच्छामि। सर्वान्वा वः पृच्छामीति।

अहङ्कारवचनमेतत्। आधुनिकाः पण्डिता अपि सभायां गर्जन्ति पृच्छ्यै भवता मयाथ भवता पृच्छ्यते। एवं याज्ञवल्क्यो जगर्ज युष्मासु कश्चिद्यूयं सर्वे वा मां पृच्छत। अथवाहमेव युष्मासु कंचित्सर्वान्वा युष्मान् पृच्छामि ॥

ते ह ब्राह्मणा न दधृषुः ॥ २७ ॥

किञ्चित्प्रष्टुं ते ब्राह्मणाः साहसं न चक्रुः ॥ २७ ॥

इति तृतीयाध्याये नवमं ब्राह्मणम्

●

अथ तृतीयाध्याये तृतीयं ब्राह्मणम्

तान् हैतैः श्लोकैः पप्रच्छ।

एतैः श्लोकैस्तान् पप्रच्छ। कः पप्रच्छेति जिज्ञासायां याज्ञवल्क्य एवेति। यत्पप्रच्छ तदाह—

यथा वृक्षो वनस्पतिस्तथैव पुरुषो मृषा। तस्य लोमानि पर्णानि त्वगस्योत्पाटिका बहिः ॥ १ ॥

यथा वनस्पतिर्वनानां पतिर्वृक्षो मृषा तथैव पुरुषोपि मृषा। अत्रामृषेतिच्छेदोन्याय्यः। तथाकृते यथातथयोरसाङ्गत्यापत्तेः। यथा वनस्पतिरमृषा तथा पुरुषो-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

मृषेति स्वीकारे वनस्पत्यादीनामपि पुरुषस्येवामृषात्वं स्यात् तच्च सर्वदर्शनकाराणां मते नितान्तं विरुद्धमेव। वृक्षपुरुषयोः सादृश्यमाह—तस्य पुरुषस्य लोमान्येव पर्णानि। अस्य त्वगेव वृक्षस्य बहिर्भवोत्पाटिका बाह्यस्त्वगित्यर्थः ॥ १ ॥

त्वच एवास्य रुधिरं प्रस्पन्दि त्वच उत्पटः। तस्मात्तदातृण्णात्प्रैति रसो वृक्षादिवाहतात् ॥ २ ॥

अस्य पुरुषस्य त्वच एव रुधिरं प्रस्पन्दि, वनस्पतेरपि त्वच उत्पटः क्षीरादिप्रवाहः। उत्पटतीत्युत्पटः। अट पट गतौ। नीचैः स्थितं दुग्धाद्युपर्यागच्छति। एवं यथाहतात्ताडिताद्वृक्षाद्रसः प्रैति बहिर्निर्गच्छति तथातृण्णाद्धिसिताच्छिन्नाद्भागाद्रसो रुधिरं प्रवहति ॥२॥

मांसान्यस्य शकराणि किनाटं स्नाव तत्स्थिरम्। अस्थीन्यन्तरतो दारूणि मज्जा मज्जोपमा कृता ॥ ३ ॥

वनस्पतेः शकराणि शकलानि पुरुषस्यास्य मांसानि मांसस्थानीयानि। वृक्षस्य तत्स्थिरं दृढं किनाटं वल्कलं पुरुषस्य स्नाव शिरा। वृक्षस्यान्तरतो दारूणि काष्ठानि तत्स्थानीयानि पुरुषस्यास्थीनि। निस्तक्षिते वल्कलादिरहिते वृक्षावयवे यो भागः प्रतीयते सा पुरुषस्य मज्जोपमा मज्जा ॥ ३ ॥

यद्वृक्षो वृक्णो रोहति मूलान्नवतरः पुनः। मर्त्यः स्विन्मृत्युना वृक्णः कस्मान्मूलात्प्ररोहति ॥४॥

यद्यथा वृक्णश्छिन्नो वृक्षः पुनर्मूलान्नवतरो भूत्वा रोहति प्ररोहति तथैव मृत्युना वृक्णः पुरुषो मूलात्कस्मान्न प्ररोहतीति प्रश्नः। नेत्यध्याहार्यम्। स च जाड्यसूचकः। मृत्युना पुरुषो न वृश्च्यते हन्यते हि। तस्मात्प्राणस्त्याज्यते। निष्प्राणः पुरुषो न भवति समर्थः पुनरेव प्ररोढुम्। वृक्षोपि यदि मूलाद्वृक्णः स्यान्न पुनः प्ररोहेत् शुष्येदेव। तर्ह्यत्रापरः प्रश्नः। यथा वृक्षो वृक्णः प्ररोहति तथाङ्गुल्यादिषु वृक्णः पुरुषः कथं न पुनरङ्गुलिमान् भवतीति। नात्रैष प्रश्नस्ततो नोत्तरं मृग्यम्। अथवा नेति नाध्याहार्यम्। मृत्युना मूलाद्वृक्णः पुरुषः कस्मान्मूलात्प्ररोहति प्ररोहेदितिभावः। मूलाभावान्न प्ररोहतीति हृदयम् ॥ ४ ॥

रेतस इति मा वोचत जीवतस्तत्प्रजायते। धानारुह इव वै वृक्षोऽञ्जसा प्रेत्य संभवः ॥ ५ ॥

यद्युच्यते रेतस इति। रेतो नाम पुरुषशरीरधातुविशेषः। तस्मादेव पुरुषः कथं न पुनः प्ररोहतीति प्रश्नः। अस्योत्तरं मा वोचतेति। एवं मा वद। कुतः? तद्रेतो जीवतः प्रजायते। पुरुषस्तु मृतः। मृतात्पुरुषान्न रेतःसम्भवः। न हि वृक्षविषये तथा वक्तुं शक्यम्। यतस्स धानारुहो बीजरुहः। धानाभ्य स रोहति न रेतस इति। धानाभ्यस्तस्य पुनर्भवः संभवति न पुरुषस्य। ननु अन्याया धान्याया अन्यो वृक्ष उत्पद्यते तस्या एव धान्याया यत सा तु वृक्षमुत्पाद्य तत्कालमेव विनष्टा। एवं तु पुरुषविषयेप्युक्तं स्यात्। यस्माद्रेतसः पुरुष उदपद्यत तद्रेतोपि पुरुषोत्पत्तिसामग्रीमुत्पाद्यैव विनष्टम्। अन्यस्माद्रेतसस्तु अन्यस्य पुरुषस्यापि संभवो नासंभवः। श्लोके इव वै इत्यव्ययद्वयं निरर्थकं पादपूरणार्थकं वा ॥ ५ ॥

यत्समूलमावृहेयुर्वृक्षं न पुनराभवेत्। मर्त्यः स्विन्मृत्युना वृक्णः कस्मान्मूलात्प्ररोहति ॥ ६ ॥

यद्यदि वृक्षं समूलमावृहेयुरुत्पाटयेयुः सोपि पुनर्नाभवेन्नोत्पद्येत। एवं मर्त्यः स्वित् पुरुषोपि मृत्युना वृक्णो मूलाभावात्कस्मान्मूलात्प्ररोहति प्ररोहेत्। पुनस्तस्य प्ररोहणसंभव इति भावः ॥ ६ ॥

जात एव न जायेत कोन्वेनं जनयेत्पुनः। विज्ञानमानन्दं ब्रह्म रातिर्दातुः परायणम् ॥ ७ ॥

जात एव सकृदेवोत्पन्नः। न जायेत पुनर्न स उत्पद्येत। कारणाभावात् एनमात्मानं पुनः को नु जनयेत्। न कोपि तमुत्पादयितुं क्षम इति भावः। मरणानन्तरं स विज्ञानं विज्ञानरूपो भवति, आनन्दमानन्दरूपो भवति, ब्रह्म ब्रह्मस्वरूपश्च भवति। अत एव तस्य रातौ रातेः। षष्ठ्यर्थे प्रथमा। रादाने। दानस्य। दातुरपि परायणं सा ब्रह्मस्थितिरेव परमनुत्तममयनं स्थानं गतिर्वा भवति। तत उत्कृष्टा गतिर्नास्तीति। जातः पुरुषो मृतः सन् ब्रह्मरूपतामधिगच्छति न पुनरावर्तते। एवं च नित्यः पुरुष इति सर्वेषामास्तिकानां घोषो निरर्थक इत्येतावता सिद्धम् ॥

तिष्ठमानस्य तद्विद इति ॥ ७ ॥

पदद्वयमेतत्पूर्वश्लोकान्वयि। आर्षीयं पद्धतिः।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

विदो ज्ञातुरात्मनः। तिष्ठमानस्य प्रयतमानस्य कुर्वन्नेवेह कर्माणीतिवेदोक्तदिशा सत्कर्मणि प्रयतमानस्य मरणमेव परायणमिति सम्बन्धः, न कस्यापि पुनर्जन्म। मरणमेव परायणमित्युपनिषदुपदेशः। एवं च पुरुषो मृषेत्यत्राकारप्रश्नोयं कृत्वा पुरुषोमृत इत्यर्थसम्पादने श्रमो व्यर्थ एव ॥ ७ ॥

इति श्रीबृहदारण्यकोपनिषदि तृतीयाध्याये तृतीयं ब्राह्मणं

•

अथ बृहदारण्यकोपनिषदि

चतुर्थाध्याये तृतीयं ब्राह्मणम्

जनकं ह वैदेहं याज्ञवल्क्यो जगाम। स मेने न वदिष्य इति। अथ ह यज्जनकश्च वैदेहो याज्ञवल्क्यश्चाग्निहोत्रे समूदति। तस्मै ह याज्ञवल्क्यो वरं ददौ। स ह कामप्रश्नमेव वव्रे। तं हास्मै ददौ। तं ह सम्राडेव पूर्वं पप्रच्छ ॥ १ ॥

याज्ञवल्क्यो जनकं जगाम। स च मेने व्यचारयत् जनकं प्राप्य नाहं वदिष्यामीति। परं जनकं प्राप्य याज्ञवल्क्यः स्वविचारं विच्छिद्य स च जनकश्चाग्निहोत्रविषये समूदति संवादं कृतवन्तौ। संतुष्टो याज्ञवल्क्यस्तस्मै जनकाय वरं ददौ वरं ब्रूहीत्याज्ञप्तवान्। स ह जनकः कामप्रश्नमेव वव्रेपेक्षितांशप्रश्नमेव वरं वृतवान्। तं च वरं याज्ञवल्क्योस्मै जनकाय ददौ। पश्चात् सम्राडेव जनक एव याज्ञवल्क्यं पूर्वं पृष्टवान्। सम्राट्शब्दोत्र सामान्यतया राजवाचकः ॥ १ ॥

याज्ञवल्क्य किंज्योतिरयं पुरुष इति। आदित्यज्योतिः सम्राडिति होवाच। आदित्येनैवायं ज्योतिषास्ते पल्ययते कर्मं कुरुते। विपल्येतीति। एवमेवैतद्याज्ञवल्क्य ॥ २ ॥

आत्मानमुद्दिश्यायं प्रश्नः। हे याज्ञवल्क्य, अयं पुरुष आत्मा किं ज्योतिः। ज्योतिःशब्दोत्र साधनवाचकः। अस्य पुरुषस्य किं साधनं येनायं व्यवहारं करोति। आदित्यज्योतिरादित्य एव ज्योतिर्यस्य तादृशोयं पुरुषः इति याज्ञवल्क्यो जनकमुवाच। तदेव समर्थयते। आदित्येनैव ज्योतिषा पुरुष आस्ते जीवतीत्यर्थः। अत्रासूधातोः प्राणधारणमेवार्थः। लोकेपि देवदत्तं मुमूर्षुं दृष्ट्वा निवर्तमानं कञ्चित्कश्चित्पृच्छति कीदृवस इति। स वदति आस्त इति। पल्ययते पर्ययते इतस्ततो गच्छति। कर्म च कुरुते। विपल्येति प्रतिनिवृत्यागच्छति च। याज्ञवल्क्योक्तं जनकः समर्थयत एवमेवैतदिति ॥ २ ॥

पुनः जनकः पृच्छति—

अस्तमित आदित्य याज्ञवल्क्य किं ज्योतिरेवायं पुरुष इति। चन्द्रमा एवास्य ज्योतिर्भवतीति। चन्द्रमसैवायं ज्योतिषास्ते पल्ययते कर्म कुरुते विपल्येतीति। एवमेव याज्ञवल्क्य ॥ ३ ॥

न हि सार्वदिकं सार्वकालिकं चादित्यभवनम्। तस्मिन्नस्तमिते स्यात्मनः किं ज्योतिरिति। अन्यत्स्पष्टम् ॥ ३ ॥

अस्तमित आदित्ये याज्ञवल्क्य चन्द्रमस्यस्तमिते किं ज्योतिरेवायं पुरुष इति। अग्निरेवास्य ज्योतिर्भवतीति। अग्निनैवायं ज्योतिषास्ते पल्ययते कर्म कुरुते विपल्येतीति। एवमेवैतद्याज्ञवल्क्य ॥ ४ ॥

स्पष्टम् ॥ ४ ॥

अस्तमित आदित्ये याज्ञवल्क्य चन्द्रमस्यस्तमिते शान्तेग्नौ किंज्योतिरेवायं पुरुष इति। वागेवास्य ज्योतिर्भवतीति। वाचैवायं ज्योतिषास्ते पल्ययते कर्म कुरुते विपल्येतीति। तस्माद्वै सम्राडपि यत्र स्वः पाणिर्न विनिर्ज्ञायतेथ यत्र वागुच्चरत्युपैव तत्र न्येतीति। एवमेवैतद्याज्ञवल्क्य ॥ ५ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

आदित्ये चन्द्रमसि चास्तमिते शान्ते वाग्नौ किंज्योतिरयं पुरुष इति पुनः प्रश्नो जनकस्य वागिति शब्द इत्युत्तरं याज्ञवल्क्यस्य। तदेव स्पष्टयति यत्र नास्ति प्रकाशः प्रकाशसाधनं वा तत्र शब्देन व्यवहारो जायते। पाणिन्धमेध्वन्यपि उच्चरमाणं शब्दमाकर्ण्य जिगमिषितं प्रति न्येति नितरमिति गच्छति ॥ ५ ॥

अस्तमित आदित्ये याज्ञवल्क्य चन्द्रमस्यस्तमिते शान्तेग्नौ शान्तायां वाचि किंज्योतिरेवायं पुरुष इति। आत्मैवास्य ज्योतिर्भवति। आत्मनैवायं ज्योतिषास्ते पल्ययते कर्म कुरुते विपल्येतीति। एवमेवैतद्याज्ञवल्क्य ॥ ६ ॥

यदादित्यश्चन्द्रमाश्चापि न स्तो वागपि शान्ता तदा किञ्ज्योतिरयं पुरुष इति पुनः प्रश्नो जनकस्य। आत्मेवास्य ज्योतिर्भवतीत्युत्तरम्। अत्रात्मनो ज्योतिष्ट्वनिरूपणेन स्पष्टं भवति पूर्वं सर्वत्र पुरुषशब्देन शरीरमेवोच्यते। किं ज्योतिरयं पुरुष इति प्रश्नस्यात्मैवास्य ज्योतिर्भवतीत्युत्तरेण मदुक्तं सर्वं सुस्पष्टम्। आत्मनैवायं ज्योतिषास्त इत्यादिनापि मदुक्तमेव सिद्धयति। अन्यत्स्पष्टम् ॥ ६ ॥

कतम आत्मेति। योयं विज्ञानमय। प्राणेषु हृद्यन्तर्ज्योतिः पुरुषः।

आत्मनायं ज्योतिषास्त इत्युक्तम्। तत्र पृच्छति कतम आत्मेति। अयं भावः। अस्मिन्नेवाध्याये प्रथमे ब्राह्मणे प्राणो ब्रह्म चक्षुर्वै ब्रह्म श्रोत्रं वै ब्रह्म मनो वै ब्रह्मेत्याद्युक्तम्। तत्र ब्रह्मविषय आचार्यशिष्ययोर्नास्ति कश्चन निर्णयः। अत्र च पुरुषस्य ज्योतिरात्मेति प्रतिपादितम्। एतेन पुरुषः शरीरमात्मा च तदधिष्ठाता कश्चनशक्तिविशेष इति प्रतिपादितं भवति। वस्तुतस्तु नात्रात्मशब्द पुरुषशब्दाद्व्यभिचरति। स्वार्थे हि प्रयुक्त इहात्मशब्दः। तथाच आत्मैवास्य ज्योतिर्भवतीत्यस्य स्वयं स्वस्य ज्योतिर्भवतीत्यर्थः। आत्मनैवायं ज्योतिषास्त इत्यस्य स्वेनैवायं ज्योतिषास्त इत्यर्थः। एवं च पुरुषस्य स्वयंप्रकाशस्वरूपता निरूपिता भवति। योयं विज्ञानमयः पुरुषः स एवात्मेति भावः। सच प्राणेषु हृदि चान्तर्ज्योतिः। ज्योतिस्स्वरूप इत्यर्थः प्राणहृद्रूपस्थाननिर्देशाद्विज्ञानमयः पुरुषो जीव एव न ब्रह्मेति। प्राणेष्वित्युक्त्या सूक्ष्मातिसूक्ष्मशरीरवस्तुषु जीवास्तित्वं सूच्यते। हृदीत्युक्त्या जीवस्याण्डपरिमाणत्वं निरूप्यते। अन्तर्ज्योतिरित्युक्त्या तस्य ज्ञानस्वरूपता सूच्यते। ननु विज्ञानमयत्वनिरूपणेनैवान्तर्ज्योतिष्ट्वमपि निरूपितमेव भवति तर्हि किमर्थं विशेषणद्वयमिति? सत्यम्। अन्तर्ज्योतिरित्यनेन जीवस्य धर्मभूतज्ञानं निर्दिश्यते। अन्तरितिस्थाननिर्देशेन न हि जीवः प्रकाशस्वरूप इति सूच्यते। प्रकाशस्वरूप इत्यस्य ज्ञानस्वरूप इत्यर्थो विज्ञेयः। परं यदि ज्ञानस्वरूप एव जीवः स्यादुच्चावचकर्मसु नैव स प्रवर्तेत। अत एव विज्ञानमय इत्यत्र प्राचुर्यार्थे मयट्। विज्ञानप्रचुरो हि सः। अनेनैव ज्ञायते न स ज्ञानस्वरूपो ज्ञानवानित्येव ॥ ७ ॥

स समानः सन्नुभौ लोकावनुसंचरति ध्यायतीव लेलायतीव ॥

स एवात्मोभौ लोकावनुसंचरति। कावुभौ लोकाविति? जाग्रदवस्था स्वप्नावस्था चेत्युभे अवस्थे लोकशब्देनानुग्राह्ये। लोक्ट दर्शने। लोकत इति लोकः। स्वप्नावस्थापि स्वाप्नान् पदार्थाल्लँघोकते। जाग्रदवस्थाया लोकनं तु सर्वप्रत्यक्षम्। अयं घटोयं पट इत्याद्यवलोकनं जाग्रदवस्थायामेव भवति। तस्यां भवत्कार्यं तत्कर्तृत्वेन निर्दिश्यते। अविवक्षितो ह्याधारः। उभयोर्लोकयोः संचरणकाले जीवात्मनि भवति काचिद्विकृतिरित्याशङ्कामपसारयितुमुक्तं स समान इति। उभयोरेवावस्थयोः समानत्वमात्मन इत्युक्तं भवति। ध्यायतीति लेलायतीति क्रियाद्वयं क्रमेण जाग्रत्स्वप्नावस्थायामनुसज्जते। जाग्रदवस्थायां ध्यायति चिन्तयति विविनक्ति पदार्थानिति। स्वप्नावस्थायां तु लेलायतीव लीलायतीव। यथा लीलां कुर्वाणः कश्चिद्बालः क्षणेन किञ्चिद्वस्तु निर्माति निर्णाशयति च क्षणेनान्यन्निर्माति नाशयति चेत्येवं स्वाप्नी स्थितिः। अत उक्तं लीलायतीवेति। इवेति सादृश्ये। सादृश्यं च तद्भिन्नत्वे सति तद्गत भूयोधर्मवत्त्वम्। तर्हि जाग्रदवस्थायां ध्यायतीवेत्यत्रैवाकारस्य किं प्रयोजनम्? न किञ्चित्प्रयोजनम्। दयालुर्हि ऋषिः। लेलायती वेत्यत्रेवप्रयोगं कृत्वा ध्यायतीवेत्यत्रापीवोपजनः कृतः। वस्तुतो नास्ति किंचित्प्रयोजनम्। लेलायतीत्यत्र गुणश्रुतिरौपनिषदी ॥

स हि स्वप्नो भूत्वेमं लोकमतिक्रास्यति मृत्यो रूपाणि ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

स आत्मैव स्वप्नः स्वाप्नो भूत्वेमं लोकं जाग्रदवस्थामतिक्राम्यति। मृत्योः स्वप्नावस्थायाश्च रूपं गृह्णातीति शेषः। मृत्युशब्देनात्र स्वप्नावस्थाभिप्रेता। रूपाणीत्यस्य दर्शनानीत्यर्थः। स्वापदशायां यानि यानि दर्शनानि भवन्ति तानि सर्वाणि स गृह्णात्येव। अतएव जागरितः सन् स्मरतिः मया दृष्टमिदं दृष्टमिदं इति। स्वप्नावस्थायामपि सुषुप्ताविव न भवति देहभानम्। स्वाप्नपदार्थादन्यत्किञ्चिद्वस्तुभानमपि न भवति तदा ततो मृत्योरित्युक्तम्। ननु स हि स्वप्नो भूत्वेत्युक्तम्। अनेन ज्ञायते दशानुगुणाः परिणामा आत्मनि जायन्त एवेति। न स्वप्न इत्यस्य स्वाप्न इत्यर्थः। अर्शआदित्वादः। स्वप्नावस्थावस्थित इत्यर्थको हि स्वप्नशब्दः॥

यथा स्वप्नसम्बन्ध औपाधिकस्तथैवेन्द्रियादिसम्बन्धोऽप्यौपाधिक एवेत्याह—

स वा अयं पुरुषो जायमानः शरीरमभिसम्पद्यमानः पाप्मभिः संसृज्यते। स उत्क्रामन्म्रियमाणः पाप्मनो विजहाति॥ ८॥

सोयं पुरुषो जायमानस्ततः शरीरमभिसम्पद्यमानः शरीरेण सह सम्बद्ध्यमानः पाप्मभिः संसृज्यते। पाप्मन् शब्द इह कर्मवाची। कर्मभिः संसृज्यत इति तदर्थः। स चोत्क्रामन्देहादिति विभिन्नक्रमः। पूर्वं म्रियमाणः पश्चाच्च देहादुत्क्रामन्पाप्मनो विजहाति पापाख्यानि पुण्याख्यानि च सर्वाण्येव परित्यजति। मरणं शरीरसम्बन्धपरिहारः। सम्बन्धं परित्यजैवोत्क्रमणं सम्भवति। शरीरेण कृतैः पापपुण्याख्यैः कर्मभिः सम्बन्ध आत्मनः शरीरसम्बन्धे सत्येव। विनष्टे च तत्सम्बन्धे तत्सम्बद्धानां सर्वेषां वस्तूनां क्रियाणां वा कर्मणां वा सुतरामसङ्गः सिद्धः। ननु कर्तर्यात्मनि विनष्टे मृते वा कर्मणां फलं किमाश्रयं तिष्ठेत्? उच्यते। कस्यचिद्वधं कुर्वाणो गृहीतश्चेद्देवदत्तो न्यायालयाद्दण्ड्यो भवतीत्येतद्यथा सर्वप्रत्यक्षं सर्वावगतं च तथैव न्यायालय एवाकस्मान्मृते देवदत्ते कं स दण्ड आश्रयेत्? न कमपि। तत्रैवाभियोगः समाप्तः। तथैव कर्मकर्तरि विनष्टे कर्मफलमपि विनश्यत्येव। वस्तुतः कर्मफलभोगसिद्धान्तः काल्पनिकः। कस्य कर्मणः किं फलं केन निर्धारितं कियच्चेति सर्वमविज्ञायैव फलकल्पना सम्पन्ना। इदमेव सत्यं प्रकटयन्त्याह भगवती श्रुति म्रियमाणः पाप्मनो विजहातीति॥ ८॥

इदमेव विस्पष्टयति—

तस्य वा एतस्य पुरुषस्य द्वे एव स्थाने भवतः। इदं च परलोकस्थानं च। सन्ध्यं तृतीयं स्वप्नस्थानम्। तस्मिन्सन्ध्ये स्थाने तिष्ठन्नेते उभे स्थाने पश्यतीदं च परलोकस्थानं च।

शरीरपतनानन्तरं तस्यैतस्य पुरुषस्य द्वे एव स्थाने भवतः। स्थानं स्थितिः। एवकारो द्विस्थानातिरिक्तस्थानसत्तानिवर्तकः। के ते द्वे स्थाने इत्याह—इदं वर्तमानं जन्म शरीरग्रहणं भोगायतनं भोगसाधनं च। इदं शरीरमेवास्यैका स्थितिः। परलोको मृत्युः। स च द्वितीया स्थितिः। परलोकस्थानमित्यस्य परलोके स्थानमिति नार्थः। पुरुषस्य जन्म मरणं चेत्येव स्थितिद्वयं न तृतीया स्थितिः। ननु सन्ध्यं तृतीयं स्वप्नस्थानमित्युच्यत एव कथं तर्हि द्वे एव स्थिती इति। उच्यते। स्वप्नस्थानस्पर्शनं न प्राकरणिकम्। प्रासङ्गिकं हि तत्। स्वप्नदशायां मनुष्यः कदाचिन्मृत्युं पश्यति कदाचिच्च मृत्योरूर्ध्वगतिमिति। मृत्युर्मृत्योः परस्ताद्वा या गतिः स एव परलोकः। स्वप्ने यथा जनः स्वशरीरेण क्रियमाणा विभिन्नाः क्रिया अनुभवति साक्षात्पश्यतीव वा तथैव स शरीरमृत्युमपि पश्यति। मृतोहमित्यवबोधति। सन्धौ भवं सन्ध्यम्। स्वप्नावस्थायां सर्वेषां सन्धेरवकाश इति तत्सन्ध्यं तृतीयं स्थानमुच्यते। वस्तुतस्तु द्वे एव स्थिती इति।

अथ यथाक्रमोयं परलोकस्थाने भवति तमाक्रममाक्रम्योभयान्पाप्मन आनन्दांश्च पश्यति। स यत्र प्रस्वपित्यस्य लोकस्य सर्वावतो मात्रामुपादाय स्वयं विहत्य स्वयं निर्माय स्वेन भासा स्वेन ज्योतिषा प्रस्वपिति। अत्रायं पुरुषः स्वयं ज्योतिर्भवति॥ ९॥

इदमपि सर्वं स्वप्नावस्थानिरूपणपरं वाक्यम्। स्वप्नावस्थायामयमात्मा पुरुषो वा परलोकस्थाने परलोकदर्शने यथाक्रमो भवति तम् आक्रममाक्रम्योभयान् पश्यति पाप्मान आनन्दांश्च। अयं भावः। स्वापस्थितौ निपतितः पुरुषो जगदपि पश्यति परलोकमपि। स्व

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

जीवन्तं बहुविधानि कर्माणि कुर्वन्तमपि पश्यति मृतमपि पश्यपि म्रियमाणं मरिष्यमाणं चापि पश्यति। आक्रम इहावस्था ग्राह्या। यथावस्थो भवति स्वप्नद्रष्टा परलोके स्वप्नकल्पिते तमाक्रमं तामवस्थामाक्रम्याश्रित्योभयान् पश्यति। यदि स स्वप्ने पापावस्थां विचारयति पापं पश्यति पुण्यावस्थां विचारयति तदानन्दान्पश्यति। पापः पापं विचारयत्यतः पापावस्थो भवति। यदि कश्चिद्धार्मिको धर्मं ध्यायति धर्मावस्थो भवति सः। पापावस्थः पापं स्वप्ने वस्तु पश्यति धर्मावस्थश्च धर्म्यं वस्तु। इदमेव स्पष्टयति स यत्रेत्यादिना। स स्वप्नद्रष्टा यत्र यदा प्रस्वपिति येषु येषु विचारेषु वा स्वपिति, अस्य लोकस्य सर्वावतः सर्ववतः, लोके सर्वाण्येवानिष्टानीष्टानिव वस्तूनि सन्तीति सर्ववान् स उच्यते। मात्रां सम्बन्धमपादाय विच्छिद्य स्वयं विहृत्य हृतमिव कृत्वा स्वयं निर्माय च स्वरमणानुकूलं जगत्, स्वेन स्वकीययाभासा दीप्त्या मनोरूपया ज्योतिषा प्रकाशेन सामर्थ्येनानुभवन्प्रस्वपिति निद्राति। अत्र स्वप्नदर्शनकालेयं पुरुषः स्वप्नद्रष्टा जगन्निर्माता च स्वयं ज्योतिर्भवति। जाग्रदवस्थायां यथा सर्वं वस्तु बहिःप्रकाशसापेक्षं भवति न भवति तथा स्वाप्नं वस्तु। स्वप्नद्रष्टा स्वज्योतिषैवान्तःप्रसृतेन सर्वं स्वसृष्टं पश्यति ॥ ९ ॥

पुनस्तदेव विवृणोति—

न तत्र रथा न रथयोगा न पन्थानो भवन्ति। अथ रथान्रथयोगान्पथः सृजते। न तत्रानन्दा मुदः प्रमुदो भवन्ति। अथानन्दान्मुदः प्रमुदः सृजते। न तत्र वेशान्ताः पुष्करिण्यः स्रवन्त्यो भवन्ति। अथ वेशान्तान्पुष्करिणीः स्रवन्तीः सृजते। स हि कर्ता ॥ १० ॥

तत्र स्वप्नावस्थायां सन्ध्ये स्थाने वा न भवन्ति रथा न वा रथयोगा रथवाहा गवाश्वादयः। रथगमनयोग्याः पन्थानोपि न। अथ तथापि स्वेन भासा स्वेन ज्योतिषात्मा रथान् रथयोगानपि पथोपि तद्गमनयोग्यान् सृजते। आनन्दयन्तीत्यानन्दा मोदयतीति मुदः प्रमोदयतीति प्रमुदः आनन्दसाधनानि मुत्साधनानि प्रमुत्साधनानि च तत्र न भवन्ति। तथापि तान् स एव तत्र सृजते। एवं तत्र वेशान्ताः पल्वलाः पुष्करिण्यस्तडागाः स्रवन्त्यो नद्यश्चापि न भवन्ति। अथ तथापि वेशान्तान् पुष्करिणीः स्रवन्तीश्च सृजते। एते सर्वे मानसिकान् पदार्थान् मनसैव द्रष्टा कल्पयति। ननु तत्र कर्ता कः? उच्यते स हि कर्ता। स्वप्नद्रष्टैव कर्तेति ॥ १० ॥

तदेते श्लोका भवन्ति।

स्वप्नेन शारीरमभिप्रहत्यासुप्तः सुप्तानभिचाकशीति। शुक्रमादाय पुनरैति स्थानं हिरण्मयः पुरुष एकहंसः ॥ ११ ॥

तत् तत्रोक्तेर्थे श्लोकाः भवन्त्युदीरिताः सन्ति कैश्चिदेते—स्वप्नेन स्वापेन निद्रया शारीरं श्रमेण शरीरोद्भवं श्रममभिप्रहत्य सुप्तानिन्द्रियादीन् अभिचाकशीति दीपयति स्वयमसुप्तः सन्। कः? हिरण्मयस्तेजोमयः पुरुषः स चैकहंस एक एव सर्वास्ववस्थासु हन्ति गच्छति। हन् हिंसागत्योः। स्वप्नावस्थायां श्रममपनीय शुक्रं बलं तेजः शक्तिमादाय पुनः स्थानमेति स्वास्थ्यमेति प्राप्नोति। ननु श्रान्तं शरीरम्। सुप्तं च शरीरम्। तर्हि शुक्रादानं कथं पुरुषस्य? इत्थम्। इदानीं शरीरवशगो हि पुरुषः। शरीरश्रान्तिः पुरुषस्यैव श्रान्तिः। शरीरशरीरिणोर्भेदादर्शनात्। स च पुरुषो हिरण्मयस्तेजोमयः तेजः स्वरूपः प्रकाशस्वरूप इत्यर्थः। देहादिसाधनत्वेन नान्यस्य कस्यचित्स्वकर्तव्ये कार्ये साहाय्यमन्विष्यतीति ॥ ११ ॥

प्राणेन रक्षन्नवरं कुलायं बहिष्कुलायादमृतश्चरित्वा। स ईयतेमृतो यत्र कामं हिरण्मयः पुरुष एकहंस ॥ १२ ॥

अवरमश्रेष्ठं कुलायं कौ पृथिव्यां लीनाति तथाभूतं शरीरं रक्षकमन्नादिना वा रोगशोकनिवर्तनेन वा स्वप्नावस्थायां कुलायाच्छरीराद्बहिः शरीरधर्मात्सुखदुःखाद्यादसम्बद्धः सन् सोमृतो मरणधर्ममनुपगतश्चरित्वा व्यापारं स्वेच्छया कृत्वा यत्र कामो यस्मिन् विषयेभिलाषो जागर्ति तं कामं प्राप्नोति। स्वप्नावसाने तत्तद्व्यापारेषु व्यापृतो भवतीत्यर्थः। अमृत इत्युक्त्या यावन्नम्रियते तावदेव कामाप्तेर्व्यापारस्तस्येति सूच्यते ॥ १२ ॥

स्वप्नान्त उच्चावचमीयमानो रूपाणि देवः कुरुते

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

बहूनि। उतेव स्त्रीभिः सह मोदमानो जक्षद्रतेवापि भयानि पश्यन् ॥ १३ ॥

स्वप्नान्ते स्वप्नकाले उच्चावचमुत्कृष्टानिकृष्टभावमीयमानः प्राप्नुवन् देवः पुरुषो बहूनि रूपाणि मनुष्यपश्वादीनि कुरुते सम्पादयति। तदेव विस्पष्टयति, स्त्रीलोलुपश्चेत्स्त्रीभिः सह मोदमानः, बुभुक्षुश्चेज्जक्षत्। निर्बलमनाश्चेद्भयानि यतस्तत आगतानि आगमिष्यन्ति वा पश्यन्ननुभवन्नास्त इतिशेषः ॥ १३ ॥

आराममस्य पश्यन्ति न तं पश्यति कश्चनेति तं नायतं बोधयेदित्याहुः दुर्भिषज्यं हास्मै भवति यमेष न प्रतिपद्यते। अथो खल्वाहुर्जागरित देशएवास्यैष इति। यानि ह्येव जाग्रत्पश्यति तानि सुप्त इति। अत्रायं पुरुषः स्वयंज्योतिर्भवति। सोहं भगवते सहस्रं ददामि। अत ऊर्ध्वं विमोक्षय ब्रूहीति ॥ १४ ॥

लोका अस्यात्मन आराममारमणसाधनं दारवित्तादिकं पश्यन्ति परं कश्चन तमात्मानं न पश्यति, इति तमयतमजितेन्द्रियं कामासक्तं न बोधयेन्न जागरयेत्। ननु सर्वंमसम्बद्धमिव प्रतिभाति। स्वप्नावस्थायां यैर्यैः साधनैरात्मा रमते तानि साधनान्यपि न केनापि दृश्यन्ते कथं तर्ह्यारामस्य पश्यन्तीतिवचः सुवचः स्यात्। सत्यम्। देहलीदीपन्यायेन नेत्युभयत्र योज्यम्, आराममस्य न पश्यति कश्च तं न पश्यति कश्चनेति। किञ्चिदन्यदुपदिशति प्रसङ्गात्--तं नायतं बोधयेदित्याहुर्विद्वांसः कथयन्ति तमात्मानमयतमितस्ततो भोगेषु व्यापृतं तदानीं न बोधयेत्प्रबोधयेत्। कुतः? दुर्भिषज्यं हास्मै भवति। स्वप्नदर्शनकाले स्वाप्नपदार्थेषु तेषु तेष्वासक्तमात्मानं यदि प्रबोधयेत् दुर्भिषज्यं हि तद्भवति निरुपायं हि तद्भवति। किं तत्? यमेष न प्रतिपद्यते स्वप्ने यं पदार्थं सोनुमन्नास्ते स्वप्नभङ्गे स पदार्थस्तथा विनष्टो भवति यथा न पुनर्दर्शनपथमायातीति। अथो खल्वाहुः केचन विद्वांस इतोन्यथा कथयन्ति। तथा हि स्वप्नभङ्गे स्वाप्नपदार्थस्य भङ्गो भवति न च स पुनराप्यते इति न। कुतः? अस्यात्मनः एष स पदार्थो जागरितदेश एवास्ति। जागरितावस्थायां ये पदार्था अनुभूता स्त एव स्वप्नदशायां दृश्यन्ते। स्वप्नभङ्गेपि ते पदार्था बहिस्त्ववतिष्ठन्त एव। तदेव स्पष्टयति—यानि हि वस्तुजातानि स जाग्रत् सन् पश्यति तान्येव सुप्त इति। अत्र स्वप्नस्वाप्नविषये विदुषोर्विचारभेदः। स्वप्नजागरयोर्भेदमाह—अत्र स्वप्नकाले पुरुषः स्वयं ज्योतिर्भवति न भवतीन्द्रियाद्यपेक्षा। जागरावस्थायां तु न स्वयं ज्योतिष्ट्वमात्मनः। इन्द्रियाण्यन्तरेण न किञ्चदपि रूपादिकं जानातीति। प्रसन्नो जनकोब्रवीत् सोहमुपदिष्टो भगवता भगवते तुभ्यं सहस्रं ददामीति। गवां सहस्रं निष्काणां वा सहस्रमिति नात्रार्थः। न हि तत्त्वजिज्ञासोरर्थेन लौकिकेन किञ्चित्प्रयोजनम्। सहस्रं गवां गृहीत्वा कुत्र स स्थापयेत्। निष्कान् वा सहस्रं गृहीत्वा कथमात्मानमात्मज्ञं प्रख्यापयेत्। अतः सहस्रं ददामीत्यस्य सहस्रं धन्यवादान्ददामीत्यर्थोथवा सहस्रं प्रणामान् विदधामि कृतकृत्यो भूत्वेत्यर्थः। अथैतत्सर्वं नातीवोपयुक्तं मोक्षमिच्छतामिति विमोक्षायात ऊर्ध्वं ब्रूहि मार्गमितिशेषः ॥ १४ ॥

अत्रैतत्सर्वं व्याख्यानं निरर्थकमेव। इहोपनिषद्विद्याविद्योत नावसरे को नामावसरः सन्ध्यनिरूपणस्य? सप्तम्यां श्रुतौ कतम आत्मेति प्रश्नमुद्भाव्य योयं विज्ञानमयः प्राणेषु हृद्यन्तर्ज्योतिः पुरुषः इत्युत्तरमाह। अतः परं सः समानः सन्नित्यादिकाः श्रुतयो निर्मूला एव दृश्यन्ते। नास्त्यृग्वेदादौ तन्मूलम्। वेदानुक्तोक्तयो न बहु मन्तव्याः। ननु मन्वादिधर्मशास्त्रप्रणेतारोपि बहुशो वेदानुक्तमेव ब्रुवन्ति तथापि तत्सर्वैः स्वीकार्यमेव भवतीति। न। न हि मन्वाद्युक्तं सर्वं स्वीकार्यं भवति। मन्वादिभिरुक्तमत एव तत्सर्वैः स्वीकर्तव्यमिति नैवापतति। लौकिको व्यवहारमार्ग एव तद्दर्शितो मानवीयः। सोपीदानीमुपेक्षणीयतां गतः। धर्मशास्त्रवचनानां धर्मशास्त्रवचनैरेवापवादो दृश्यते। न तथा वेदेषु। न हि चत्वारो वा त्रयो वा वेदा यत्किञ्चिद्वेदविरुद्धमुपदिशन्ति। न तथा शास्त्रेषु। तानि च परस्परविरुद्धं वदन्ति न श्राम्यन्ति। न हि नियतवचांसि तानि शास्त्राणि। वेदास्तु नियतवचसः। न क्वापि तेषु परस्परविरोधः श्रूयते। अतएव तेषां धर्मकर्ममर्मावबोधनविषये परमं प्रामाण्यं सर्वैरेव स्वीकृतम्। स पुरुषः किं करोतीति प्रश्नो यदि स्यात्स उभौ लोकावनुसंचरतीत्याद्युत्तरमौचित्यं भजेत। कतम आत्मेत्यस्योभौ लोकावनुसंचरति ध्यायतीव

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

लेलायतीवेत्याद्युत्तरमाम्रान् पृष्टः कोविदारानाचष्ट इत्याभाणकं स्मारयति। अथवा भवतु नाम यथाकथंचिदौचित्यं तस्या अत्र परन्तु ततः परमष्टम्या श्रुतेस्तु नास्त्येव किञ्चिदप्यौचित्यम्। तस्य वा एतस्य पुरुषस्य द्वे एव स्थाने भवत इदं च परलोकस्थानं चेत्यादि वचनं तु कथञ्चिच्छ्रोतव्यं परं सन्ध्यं तृतीयं स्थानं स्वप्नस्थानमित्यारम्भ सोऽहं भगवते सहस्रं ददामि" (४।३।१४) इत्यन्ताः श्रुतयस्तु निरर्थिका एव। नास्ति तासामत्रोपयोगः। वस्तुतस्तु तृतीयब्राह्मणान्तो भागोऽत्र केवलं ब्राह्मणम्। नोपनिषल्लेशोऽत्र। ब्राह्मणेष्वेवार्थवादाः स्तुतयो वा शोभन्ते न तूपनिषत्सु ब्रह्मविद्याबोधिकासु वचस्ततिषु। न चापौरुषेया वेदा इवोपनिषदोऽप्यपौरुषेय्य एवेति कथं न ताः समादरणाया इति? हन्त समादरणाया एव परं न ता औपरुषेय्यः पुरुषनिर्मिता एव ताः संवादभूयिष्ठाः। किंच वेदानामपौरुषेयत्वेनैव, प्रामाण्यं ग्राह्यत्वं चेति न। तदुक्तयो हृदयं गृह्णन्ति बुद्धिकोषं च विकासयन्ति। ब्राह्मणवचनानि त्वर्थवादभूयिष्ठानीति न तत्र विलोचकानां लोचनानि पतन्ति। अतोऽतःपरं ब्राह्मणभाग इति धिया सम्यगवधार्यावधीरितं त्यक्तं च सर्वम्। उपनिषदेव मया व्याख्येया न तु ब्राह्मणानिति पूर्वमेव प्रतिज्ञातं मया। अन्येषु तद्व्याख्यातृषु महाचार्येषु नास्माकः कोपि कोपो वा विद्वेषो वा। तैर्यत्किञ्चिद्व्याख्यातमिह तत्सर्वस्य नास्त्येवोपनिषत्त्वमित्येव नो व्यायोगः। अतएव "अत ऊर्ध्वं विमोक्षायैव ब्रूहि" (४।३।१५–३३) पुनरुक्तं दृश्यते॥

इति बृहदारण्यकोपनिषदि चतुर्थाध्याये तृतीयं ब्राह्मणं

•

अथ चतुर्थाध्याये चतुर्थं ब्राह्मणम्

स यत्रायमात्माबल्यं न्येत्य संमोहमिव न्येत्यथैनमेते प्राणा अभिसमायान्ति। स एतास्तेजोमात्राः समभ्याददानो हृदयमेवान्ववक्रामति। स यत्रैष चाक्षुषः पुरुषः पराङ्पर्यावर्तते। अथारूपज्ञो भवति॥ १॥

आत्मनो मृत्युवेलावर्णनमुपक्रमते। स आत्मायं यत्र यस्मिन्काल आबल्यं नैर्बल्यं न्येत्य नितरामेत्य संमोहमिव परिक्षीणमोहमिव न्येति प्राप्नोति, अथ तदानीमेते प्राणा वागादय एनमात्मानमभिसमायान्ति। आत्मैव देहे प्राधान्यं धत्ते। अतो यदा क्षीणशक्तिर्भूत्वा शरीराच्चिरन्तनं सम्बन्ध विचिच्छित्सति तदा सर्वे प्राणादयस्तत्समीप आगच्छन्तीव। तदा स आत्मा एतास्तेजोमात्रास्तेजसोवयवाँश्चक्षुरादीन् समभ्याददानः संगृह्णन् हृदयमेव हृदयप्रदेशमेवान्ववक्राम्यति सन्तिष्ठते। एवकाराद्व्यज्यते मृत्युकाले सर्वेषु देहावयवेषु सन्नेष्वपि हृदयं स्फुरत्येव। स्फुरणकारणं तत्रात्मसन्निधानमेव। एष चाक्षुषः पुरुषो देहरूपो यत्र यस्मिन् क्षणे पराङ् प्रतिकूलं पर्यावर्ततेऽथारूपज्ञो भवति। रूपज्ञानसाधनं हि चक्षुः। तदभावे सोऽरूपज्ञो भवति। अत्र चाक्षुषः पुरुष इतिकथनेन विज्ञायते चक्षुषि वर्तमाना दर्शनशक्तिरेवं चाक्षुषपुरुषत्वेन निर्दिष्टा। चक्षुर्ग्रहणं निदर्शनार्थम्। अन्यान्यपि ज्ञानेन्द्रियाणि कर्मेन्द्रियाणि च तदानीं पर्यावर्तन्त एव। एवं च चाक्षुषः पुरुष इव श्रौत्रः पुरुषो घ्राणः पुरुषो रासनः पुरुषः पर्यावर्तते इत्यपि योज्यम्। अथारूपज्ञो भवति। रूपग्राहकेन्द्रिय सति स रूपज्ञो भवति तदभावेऽरूपज्ञो भवतीति। सर्वत्रात्मैव कर्ता॥ १॥

एकीभवति न पश्यतीत्याहुः। एकीभवति न जिघ्रतीत्याहुः। एकी भवति न रसयत इत्याहुः। एकीभवति न वदतीत्याहुः। एकीभवति न शृणोतीत्याहुः। एकी भवति न मनुत इत्याहुः। एकी भवति न स्पृशतीत्याहुः। एकी भवति न विजानातीत्याहुः॥

यतः स आत्मा विषयग्राहकसर्वेन्द्रियसम्बन्धविवर्जितः सन्नेकाकी भवति ततो न किमपि पश्यति न जिघ्रति न रसयते न वदति न शृणोति न मनुते न स्पृशति न च विजानातीति लौकिकाः सम्बन्धिनो निकटवर्तिन आहुः॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तस्य हैतस्य हृदयस्याग्रं प्रद्योतते । तेन प्रद्योतेनैष आत्मा निष्क्रामति चक्षुषो वा मूर्ध्नोवान्येभ्यो वा शरीर देशेभ्यः ॥

मुमूर्षुरात्मा हृदयं संनिधत्त इत्युक्तम् । तस्य हृदयस्याग्रमग्रभागः प्रद्योतते । प्रद्योतनमिह न प्रकाशनम् । औचित्यात् । अतः प्रद्योतनं प्रस्फुटनम् । हृदयं प्रस्फुटति । क्रियाशीलता नानुशीलयतीत्यर्थः । तेन प्रद्योतेन हेतुनात्मा ततो निष्क्रामति । केन मार्गेणेत्याह चक्षुषो वा चक्षुर्मार्गेण वा मूर्ध्नो मूर्धमार्गेण वान्येभ्य वा शरीरदेशेभ्यः श्रोत्रादिमार्गैर्वा निष्क्रामति । अपादाने पञ्चमी । हृदयं परित्यज्य चक्षुः परित्यज्य मूर्धानं परित्यज्यान्यांश्च सर्वानेव शरीरदेशान् परित्यज्यात्मा निष्क्रामतीत्यर्थः । ल्यब्लोपे पञ्चमी । मया करणानुसन्धाने व्याख्यातम् ॥

तमुत्क्रामन्तं प्राणोनूत्क्रामति । प्राणमनूत्क्रांतं सर्वे प्राणा अनूत्क्रामन्ति ।

तमात्मानमुत्क्रामन्तमनुप्राणः उत्क्रामति । प्राणमुत्क्रान्तमनु सर्वे प्राणा इन्द्रियाण्युत्क्रामन्ति । अन्विष्युपसर्गवशादन्ये शरीररुंजीवका सहायका ग्रहीतव्याः ॥

सविज्ञानो भवति । सविज्ञानमेवान्ववक्रामति ।

क्रममतिक्रम्याह—सविज्ञानो ज्ञानेन सह वर्तमानो भवति । कः ? शरीरान्निर्गत आत्मेति । सविज्ञानमेवात्मानमनु अवक्रामति । कोवक्रामति ? प्राणादय इति । कथं तर्ह्येकवचनमवक्रामतीति ? समवायोक्तिरेषा । वस्तुतस्तु श्रुतिरेषाधिका । आत्मा तु ज्ञानस्वरूप एव । सस्वरूप एव स निष्क्रामति । यदि ज्ञानाधिकरणमात्मेति मन्यते तथापि तस्य ज्ञानवत्ता न हीयते । अतः सविज्ञानो भवतीत्याद्युक्तेर्नावकाशः । ननु सविज्ञानो भवतीत्यस्य स्वकृतपुण्यपापकर्मज्ञानवान्भवतीत्यर्थः कथमस्यानर्थक्यं मन्यते ? सत्यं मन्यते । पुण्यपापशब्दार्थावनिर्वचनीयाविति । किं नु पुण्यस्वरूपं किं नु पापस्वरूपमिति नाद्यावधि निर्णीतम् । अतः स्वकृतपुण्यपापकर्मज्ञानवान्भवतीति नार्थः । ननु येन यत्कर्म पापत्वेन मन्यते यच्च धर्मत्वेनाङ्गीक्रियते तस्य तदेव पापं तदेव च पुण्यमिति । हं हो तर्हि स एव पुण्यपापस्वरूपकल्पक इत्यायाति । एवं चेश्वरस्वीकारो व्यर्थतां गतः । नैवम् । यदेव पुण्यं यदेव च पापं स आत्मा निर्धारयति तदनुकूलमेवेश्वरः फलं ददातीति । एतदपि न मनोरमम् । जीवपराधीनतापाशबद्धो हि परमेश्वरः स्वातन्त्र्याद्धीयेत । एवं च सविज्ञानो भवतीत्यस्य केलवं सविज्ञानो भवतीत्यर्थः । ननु किं विनिवर्त्यते । इन्द्रियगण इति । इन्द्रियाणि विनिवर्तन्ते स्वज्ञानेन सह सोवतिष्ठत इतिभावः ॥

तं विद्याकर्मणी समन्वारभेते पूर्वप्रज्ञा च ॥ २ ॥

शरीराद्विनिवर्तमानमात्मानं तं विद्याकर्मणी समन्वारभेते । विद्या च कर्म चानुगच्छत इत्यर्थः । ननु यद्वा तद्वा सिध्यतु नाम विद्यासमन्वारम्भणं कर्मणस्तु तन्न संभवति । सर्वाण्येव कृतानि कर्माणि द्वैविध्यं गच्छन्ति । पापात्मना पुण्यात्मना च । कृतं चौर्यादिकं हृतं च चौर्यादिना वित्तादिकमत्रैव तिष्ठति । तिष्ठति चात्रैव कृतं कूपारामादिकमपि । अतः न कथंचित्पुण्यं पापं चात्मानमनुगन्तुं शक्नुत इति । एतत्सर्वविप्रतिपत्तिस्वरूपमवधार्य भगवत्या श्रुत्या स्वयमेवोक्तं पूर्वप्रज्ञाचेति । चकारोत्र पक्षान्तरग्राहकः । पूर्वाप्रज्ञा पूर्वप्रज्ञा । पूर्वमर्जितं ज्ञानमित्यर्थः । पूर्वस्मिञ्शरीरे वर्तमानेनात्मना यदर्जितं ज्ञानं तदपि तस्य सहयायि भवतीति । अथाप्यत्र किञ्चिच्चिन्तनीयम् । जीवात्मनास्मिञ्जन्मनि यादृशी यावती च विद्या गृहीता यादृशानि यावन्ति च कर्माणि सम्पादितानि शुभान्यशुभानि वा शुभाशुभानि वा यादृशी च प्रज्ञा सम्पादिता तान्येतानि सर्वाणि शरीरं परित्यज्योत्क्रामन्तमात्मानमनुगच्छंन्तीति चेच्छ्रुतेरस्या आशय तर्हि न स समीचीनतामञ्चति । अत्र विद्याप्रज्ञयोरेकतरस्या एव ग्रहणस्य प्राप्ते औचित्ये न कंचिद्विशेषमनुभवाम उभयोर्ग्रहणे । यैव विद्या सैव प्रज्ञा । यैव प्रज्ञा सैव विद्या । यदि प्रज्ञाशब्देन वासना गृह्यते तत्र विचारद्वयमापतितं भवति । पूर्वप्रज्ञेत्यत्र पूर्वशब्दस्य किं सार्थक्यम् । वासनाया आश्रयो मनो वात्मावेति । वासना हि सदसत्कर्मणोः प्रभावः । स च प्रभावो मनस्येवावतिष्ठते नात्मनि । आत्मनि तु तस्य स्थिरा एव धर्माः स्थानं लभन्ते नान्ये । कृतानां कर्मणां तु क्रमेण विनाशो नियत एव । न हि किञ्चित्कर्म स्थास्नु । फलं चापि न तस्य स्थास्नु । कर्मणां द्वावेव प्रकारौ । शुभमशुभं चेति । एते द्वे अपि कर्मणी अविज्ञात-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

स्वरूपे अनिश्चितस्वरूपे वा तिष्ठतः। न हि नियतं किञ्चिल्लक्षणं शुभस्याशुभस्य च। यदेवाद्य शुभं तदेव कालान्तरेऽशुभं भवति। अशुभं वा कालान्तरे शुभं प्रतीयते। एकेन देवसमर्पितं मांसं भक्षणीयमिति कृत्वाद्य मांसं भक्षितं तेनैव द्वितीयेऽहनि देवाय समर्पितमसमर्पितं वा किञ्चदपि मांसं कथमपि कदापि न भक्षणीयमित्यनुसन्धाय मांसभक्षणान्निरुणद्ध्यात्मानम्। यदेव मांसभक्षणं प्रथमेऽहनि धर्मत्वेनाभिमतमासीत्तदेवापरेऽहनि समानेनैव कर्त्राधर्मत्वेनानुसंहितम्। वैदिकी हिंसा हिंसा न भवतीति स्वीकृत्य गोहनने धर्मं पश्यन्नद्य तस्माद्व्यापारादधर्मबुद्ध्या निवर्तमानो दृश्यते। धर्माधर्मस्वरूपं तु कालेनैव व्याख्येयं निर्धारणीयं वा न तु ग्रन्थेन न वा विदुषा। किंच सर्वाण्येव कर्माणि दत्तफलानीति निवर्तन्ते विनश्यन्तीति। विद्याशब्देन कोऽर्थो विवक्षित इति तूपनिषदा नो व्याकृतम्। यद्यध्यात्मविद्या विवक्षिता स्यात्तर्हि सा विद्या तमनुगच्छति तत्फलं वा। विद्यानुगमने न कोऽपि लाभः। इषे त्वोर्जेत्वेतिविद्या यदि मृतं देहान्निर्गतं वात्मानमनुगच्छति को लाभस्तेन लभ्यः स्यादिति न शक्यते विज्ञातुम्। यदि तत्फलं तमनुगच्छतीति मतं स्यादशक्यमेतत्। असङ्गो ह्ययं पुरुष इत्यौपनिषदेनैव मदेन विरोध उत्पद्येत। एवं च विद्याकर्मणोः फलमनुवर्तनं न साधु सिद्धं भवति। पूर्वप्रज्ञेत्यत्र पूर्वशब्दार्थस्यासिद्धतया केवलया प्रज्ञया सह विद्यायाः समानत्वाद्विद्याविषयको विचारस्तामपि स्पृशत्येव। तथा च यथा विद्याया न संयोग आत्मना प्रज्ञाया अप्येवं वेदितव्यम्। एवं चेदं चोद्यमचोद्यमेव यदात्मानं विद्या कर्म प्रज्ञा चानुवर्तन्ते इति ॥ २ ॥

यद्यथा तृणजलायुका तृणस्यान्तं गत्वान्यमाक्रममाक्रम्यात्मानमुपसंहरत्येवमेवायमात्मेदं शरीरं निहत्याविद्यां गमयित्वान्यमाक्रममाक्रम्यात्मानमुपसंहरति ॥३॥

एकस्माच्छरीराच्छरीरान्तरगमने तस्यात्मनः स्वातन्त्र्यमेव न तु पारतंत्र्यं पारमेश्वरमित्याह जलौकादृष्टान्तेन। यथा तृणे स्थिता जलायुका तत्तृणस्यान्तं गत्वान्यमाक्रममाश्रयमाक्रम्यावलम्ब्यात्मानमुपसंहरति तस्मात्तृणात्तृणान्तरमवलम्बते, एवमेवायमात्मा शरीरमिदं वर्तमाने निहत्य परित्यज्याविद्यां गमयित्वा दूरे परित्यज्य, अथवा अविद्या कर्म तद्गमयित्वा समाप्य कर्मफलं वात्रैवानुभूय अन्यमेवाक्रमं शरीररूपमाक्रम्य गृहीत्वात्मानमुपसंहरति देहान्तरालम्बनं करोतीत्यर्थः। शरीरनिहननाविद्यानिर्गमनयोः कार्यकारणभावः। शरीरेण सह जायमानाविद्या शरीरनिवृत्त्यवधिकैव। गते शरीरे सापि गतैव भवतीति श्रुत्वा समर्प्यते। जलौकादृष्टान्तेनावगम्यते पूर्वशरीरत्यागानन्तरमव्यवहितपरमेवापरं शरीरं स स्वीकरोतीति। एतेनेदमपि ज्ञायते शरीरान्तरग्रहणे स स्वतंत्रो न परमेश्वराधीन इति। अत्रापि वेदविरोध इव दृश्यते। न ह्यात्मा स्वयमिदं शरीरं निहन्ति त्यजति शरीरान्तरं च गृह्णाति। त्याजयति ग्राहयति च परमात्मा तदिति वैदिकः पन्थाः। तथाहि—

किंचाविद्यां गमयितुं क उपायः? शरीरत्यागात्पूर्वमविद्यां गमयति पश्चाद्वा? पूर्वः पक्षस्तु नोचितः। निहत्य गमयित्वेति चोभे अपि पूर्वकालिक्यौ क्रिये। एवं च क्रमेणैव निहननं गमनं त्यजनं च स्यात्। शरीरनिहननानन्तरमेवाविद्यात्यजनं संभवति तर्हि कदा? अन्यच्छरीरपरिग्रहानन्तरं ततः पूर्वं वा? ततः पूर्वं तु न संभवति। पूर्वगृहीतशरीरसत्त्वात्। अन्य देह परिग्रहातन्तरं चेत्, तर्ह्यन्यमाक्रममाक्रम्येति वचोविरोधः प्रसज्यते। आत्मानमुपसंहरतीत्येव सत्यम्। आत्मोपसंहार आत्मनाशस्तत आत्मप्रच्यावनं वा। अत्रैवं वेदितव्यम्—शरीराविद्ययोर्नाशः समकालमेव भवति। शरीरनिहनने नैवाविद्यानिहननं भवति। अविद्यानिहननानन्तरमाक्रमस्यावसराभावादात्मात्मानमुपसंहरतीत्येव सत्यं तथ्यं चेति। निर्गमितायामविद्यायां नवतरस्य कल्याणतरस्य च रूपस्यासंभव एव। पित्र्यशरीरस्य गान्धर्वशरीरस्य दैवशरीरस्य प्राजापत्यशरीरस्य ब्राह्मशरीरस्यापि न संभवः। कारणाभावात्। अन्येषां वा भूतानामिति कथनं तु नितरामवैदिकम्। विद्याया निर्गमयिता पूतात्मा कथंकारमन्येषां भूतानां योनये स्पृहयेत्? ॥ ३ । ४ ॥

स वा अयमात्मा विज्ञानमयो मनोमयः प्राणमयश्चक्षुर्मयः श्रोत्रमयः पृथिवीमय आपोमयो वायुमय आकाशमयस्तेजोमयोतेजोमयः काममयोकाममयः क्रोधमयोक्रोधमयो धर्ममयोधर्ममयः सर्वमयः तद्यदेतदिदंमयोदोमय इति ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

स चायमात्मा शरीरस्थः शरीरान्निर्गतो वा विज्ञानमयो विज्ञानं लौकिकव्यवहारज्ञानं तन्मयः, मनोमयो मनसान्तरेण न किमपि कर्तुं शक्नोतीति मनोमयः, प्राणैरेव शरीरावस्थितिमातनोति प्राणमयः, चक्षुषैव बाह्यपदार्थनिचयं गृह्णाति निगृह्णाति वेति चक्षुर्मयः, श्रोत्रेणैव शुभमशुभं वा हितमहितं वा कार्यमकार्यं वा गन्तव्यमगन्तव्यं वेत्यादिकं शृणोतीति श्रोत्रमयः, पृथिवीमयः सर्वकृत्याधारभूतायाः पृथिव्या अन्यत्र न शक्यते स्थातुं विधातुं वा किमप्यमिष्टनिष्टं वेतिपृथिवीमयः, अद्भिरेव वदनवसननिवसनकरचरणादिप्रक्षालनं तत्पानेनासुसंरक्षणं च भवतीत्यापोमयोम्मयः, वायुमयः श्वासप्रश्वासादिभिः शरीरसत्कारो भवतीतिवायुमयः, आकाशोवकाशः, शरीरस्थितेराकाशस्यावश्यकत्वादाकाशमयः, तेजोमयः स्वस्वरूपमयः, अतेजोमयो बाह्यतेजोनपेक्षकः, काममयः काम इच्छा, सर्वास्वेव क्रियास्विच्छाया प्रधानत्वादावश्यकत्वाच्च काममयः, अकाममयः स्वभावतः, क्रोधमयो व्यवहारप्रसङ्गेषु, अक्रोधमयः स्वाभाव्यात्, धर्ममयः स्वाभाव्यात्, अधर्ममयः संसारसंसर्गात् । एवं च स आत्मा सर्वमयः । परिगणने नासन्तुष्टाश्रुतिरुपसंहरति—तद् यद् एतद् इदंमयस्तन्मयो यन्मय एतन्मय इदंमयोदोमय आत्मेति । तन्मयस्तत्तत्पदार्थमयः । यन्मयो यच्छब्दनिर्देश्यमाणपदार्थमयः । एतन्मय इदंमय एतदिदंशब्दाभ्यां यत्किञ्चित्समीपवर्ति वस्तु निर्दिश्ये तन्मय इति । अदोमय यत्किञ्चिद्दूरवर्ति वस्तु निर्दिश्यते तन्मयः । एतत्सर्वं शरीरसम्बन्धसत्त्वे विज्ञेयम् ॥

यथाकारी यथाचारी तथा भवति ।

स चात्मेह शरीरसम्बन्धवान् यथाकारी यथाकर्तुं शीलमस्य सोयं यथाकारी यथा चरितुमाचरितुं वा शीलमस्य सोयं यथाचारी भवति तथा भवती । कर्म द्विविधम् । शास्त्रविहितं शास्त्रप्रतिषिद्धं च । यदि विहितं कर्म करोति शास्त्रादिष्ट सत्फलवान्भवति । यदि प्रतिषिद्धं करोति शास्त्रादिष्टानिष्टफलभाग्भवतीति ॥

साधुकारी साधुर्भवति पापकारी पापो भवति ।

पुनस्तदेव विस्पष्टयति । साधु कर्म कर्तुं शीलमस्यासौ साधुर्भवति पुण्यात्मा भवति । पापं कर्म कर्तुं शीलमस्यासौ पापो भवति पापात्मा भवति ॥

परमकृपामयी श्रुतिः पुनः स्पष्टयति—

पुण्यः पुण्येन कर्मणा भवति पापः पापेन ।

शास्त्रदृष्टेन लोकदृष्टेन च पुण्येन कर्मणा पुण्यो भवति पुण्यवान् भवति पवित्रो वा भवति । पापेन च तथाविधेन पापः पापी भवति ।

अथो खल्वाहुः काममय एवायं पुरुष इति । स यथाकामो भवति तत्क्रतुर्भवति । यत्क्रतुर्भवति तत्कर्म कुरुते । यत्कर्म कुरुते तदभिसम्पद्यते ॥ ५ ॥

अथो खल्वाहुः केचनान्ये विद्वांसः काममय एवायं पुरुष इति । सर्वास्वेव क्रियासु कामप्राधान्यात् काममय एवायं पुरुष इति केषांचिद्विदुषां मतम् । एवं च स यथाकामो भवति तत्क्रतुर्भवति । क्रतुरत्र प्रयत्नः । तत्प्रयत्नवान् भवति । यत्क्रतुर्यत्प्रयत्नवान् भवति तत्कर्म कुरुते । यत्कर्म कुरुते तत्फलमभिसम्पद्यते । फलाभिसम्पत्तिरेव संसारः ।

तदेष श्लोको भवति । तदेव सक्तः सह कर्मणैति लिङ्गं मनो यत्र निषक्तमस्य ।

श्लोकार्धमुच्चारयति ऋषिस्तदेव सक्त इति । अस्यात्मनो मनो यत्र यस्मिन् वस्तुनि निषक्तं नितरां सक्तं भवति, तत्र कर्मणि सक्तः सन् कर्मणा तदेव लिङ्गं फलमेतीति ॥

प्राप्यान्तं कर्मणस्तस्य यत्किञ्चेह करोत्ययम् । तस्माल्लोकात्पुनरैत्यस्मै लोकाय कर्मणे ॥ इति नु कामयमानः ॥

अयमात्मेहास्मिञ्जगति यत्किंच करोति तस्य कर्मणोन्तं फलमिति यावत्, प्राप्य तस्माल्लोकादनुभवात् । लोक दर्शने । एतस्य कर्मण ईदृक्फलमित्यनुभूय कर्मणे कर्म कर्तुमेवास्मै लोकाय एतदनुभावायैव फलभोगायैवेतियावत् । पुनरैति पुनः प्रवर्तत इत्यर्थः । यदि यत्किञ्चित्करोत्यात्मा तस्य कृत्स्नस्य कर्मणः फलं प्राप्नोत्येव पुनरत्र तस्मात्परस्माल्लोकात्कुत आगच्छति स इति प्रश्नः । उत्तरं तु अस्याः श्रुतेर्मत्कृतेन व्याख्यानेनैव सम्पन्नम् । न हि कर्मफलं भोक्तुं लोकान्तरगमनं

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

साधनीयम् । अस्मिन्नेव लोकेऽस्मिन्नेव जन्मनि कृतानां कर्मणां सर्वेषामशेषं फलं लभ्यते । नैकमपि कर्म तादृशं यत्फलं जन्मान्तर एव स्यादिति । न च तस्मादित्यस्यास्या इत्यस्य च पदद्वयस्य न चारितार्थमिति वाच्यम् । तस्माल्लोकादित्यस्य तस्मादनुभवादित्येवार्थः साधीयान् । अस्मै लोकायेत्यस्य पुनरेतदनुभवाय कर्मणे कर्म कर्तुमितियावत् पुनरेतीति । तत्रापि कामयमानो नु । नु इति पक्षान्तरे । यदि स कर्म कर्तुं पुनः कामय तदा पुनः कर्मण ऐत्यागच्छति । यदि पुनः कर्म नेच्छति तदा नेमं लोकं नेमं लौकिकव्यवहारमनुहर्तुं प्रयतत इति । कर्मफलभोगाय मृतः सन् परलोकं गच्छति पुनश्च कर्मणे तत इहायाति कामयमान इति तु न संगतोर्थः । यदि सर्वाण्येव कर्माणि फलभोगेनावसन्नानि ततः पुनर्जन्मनो नास्ति हेतुः । किं च कर्म कामयमान पुनरेतीति सिद्धान्तिते कर्मकर्तुः स्वातन्त्र्यमेव गमनागमनयोः सिध्यति न पारतन्त्र्यम् । तच्चेश्वरवादिनां नैव स्यादभिमतमिति ॥

अथाकामयमानो योऽकामो निष्काम आप्तकाम आत्मकामो न तस्य प्राणा उत्क्रामन्ति । ब्रह्मैव सन् ब्रह्माप्येति ॥ ६ ॥

अथ कश्चिद्यदि न कामयेत कर्म, यत्कृतं तदेव पर्याप्तम् । नाधिकेन कर्मणा मे किञ्चित्फलमिति चेत्संदधाति तदा सोकामस्तिष्ठति यतः स निष्कामः । अथवा स आप्तकामः सर्व एव कामास्तेनाप्ताः । अत एवात्मकाम आत्मानमेव कामयते आत्मनः श्रेयो यः कामयति न तस्य प्राणा उत्क्रामत्युद्विजन्ते । न स उद्विग्नो भवतीत्याशयः । कुतः ? कर्मराहित्येन स ब्रह्मैव भवति । ब्रह्मत्वमधिगच्छन्सन् ब्रह्माप्येति ब्रह्मणि लीनो भवति । अत्र ब्रह्मैव सन् ब्रह्माप्येतीत्यधिकं वचनम् । यदि ब्रह्मणि कस्यापि लयः स्याद्विकारित्वं ब्रह्म भजेत । किं च यदि कर्मकर्तात्मा ब्रह्मैवाभूत्तर्हि कथं ब्रह्मणो ब्रह्मण्यप्ययः । अतो ब्रह्मैव सन् ब्रह्माप्येतीत्यस्य पदसमूहस्य ब्रह्म भवतीत्येवार्थः ॥६॥

तदेष श्लोको भवति ।

यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि स्थिताः । अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुत इति ॥

ये कामा मनोरथा अस्यात्मनो हृदि श्रिताः स्थिता भवन्ति ते सर्वे यदा प्रमुच्यन्ते सर्वथा दूरीभवन्ति विनश्यन्तीतियावत् अथ तदा मर्त्यो मरणधर्मात्मामृतो-मरणधर्मा भवति मृत्युं गतो न पुनर्निवर्तते । अत्र चास्यामेव स्थितौ स ब्रह्म समश्नुते मरणानन्तरं देहविलयानन्तरं स ब्रह्म ब्रह्मत्वमविनाशित्वं समश्नुते प्राप्नोति । नात्रोपासनावसरः । अत उपासनवेलायां ब्रह्मानुभवतीति नार्थः ।

तद्यथाहिनिर्ल्वयनी वल्मीके मृता प्रत्यस्ता शयीतैवमेवेदं शरीरं शेते ।

यथाहेः सर्पस्य निर्ल्वयनी विमोको मृता सर्पदेहाद्विमुक्ता वल्मीके सर्पबिले प्रत्यस्ता परित्यक्ता शयीत सर्पाकारेण वर्तमाना निश्चेष्टा वर्तते, एवमेवेदं शरीरं शेते शयानं वर्तते निश्चेष्टमिति ।

अथायमशरीरोमृतः प्राणो ब्रह्मैव तेज एव ।

अथ यदायमात्माशरीरो भवति तदैवामृतो भवति । सति शरीरे नामृतत्वमिति गम्यते । शरीरपात एवामृतत्वं तस्य । तदानीं स प्राणः प्राणनकर्तात्मा ब्रह्मैव भवति जन्ममरणबन्धनविमुक्तो भवति । ब्रह्मस्वरूपं निरूपयति—तेज एवेति । सर्वबन्धनविमुक्तः सन् स तेजःस्वरूपो भवतीतिभावः ।

सोहं भगवते सहस्रं ददामीति होवाच जनको वैदेहः ॥ ७ ॥

जनको वैदेहस्तमिति होवाच जनकः । इति किम् ? स ईदृशानुशासनेनानुशिषोहं भगवते सहस्रं ददामीति । सहस्रं व्याख्यातम् ॥ ७ ॥

तदेते श्लोका भवन्ति ।

अणुः पन्था विततः पुराणो मां स्पृष्टोनुवित्तो मयैव । तेन धीरा अपियन्ति ब्रह्मविदः स्वर्गं लोकमित ऊर्ध्वं विमुक्ताः ॥ ८ ॥

वैदेहो जनको याज्ञवल्क्याय सहस्रं दत्तवान् । ततः परं किं जातमिति नात्रोच्यते । तदेते श्लोका भवन्तीत्युच्यते । प्रकरणं तु समाप्तम् । शिष्येण गुरुदक्षिणा दत्ता । गुरुणाङ्गीकृता । अतः परं प्रकरणसमाप्तिरिव प्रतीयते । तर्ह्येते श्लोकाः कस्मै श्राविताः कस्यार्थस्य

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

च सिसाधयिषया प्रतिपिपादयिषया वा श्राविता: ? अस्तु, नात्रैवं विचारणा कार्या। स्वतन्त्रा हि भगवती श्रुति:। यद्वा तद्वा ब्रवीतु सर्वं श्रेयस्करं स्यात्। तर्हि श्रुतिर्ब्रवीति। न स्वयं स्वभावं ब्रवीति केषांचित्कांश्चिच्छ्लोकान् श्रावयति। ते च श्रोतव्या:। अणु: सूक्ष्मो दुर्विज्ञेय: पुराणश्चिन्तनात्प्रवृत्तो विततो विस्तृत: पन्था मां स्पृष्टो मया लब्ध इत्यर्थ:। यदि स पन्था अणुर्दुर्विज्ञेयस्तदा विततो न भवितुमर्हति। विततो विस्तृत: सर्वैर्ज्ञेय इत्यर्थ:। यदि विततो नाणु: तथापि श्रुतिवचनत्वेन सर्वं श्रोतव्यं सोढव्यं च। न स पन्था मां स्पृष्ट एतावदेव, किन्तु मयैवानुवित्तोपि। अनुभूतोपि। अत्र मां मयेत्यत्रास्मद्वाच्य: क इति तु नात्रोक्तम्। एवं च कस्यचित्तन्मार्गानुभविनो वचनमेतदिति तु स्पष्टम्। मन्त्रब्राह्मणे स्यादिदं वचनम्। परं तत्रान्वेष्टव्यम्। तेनाणुना यथा विततेन वा पथा पुराणेन वा पथा धीरा धियमीरयन्ति ते प्राज्ञा ब्रह्मविद इतो विमुक्ता भौतिकदेहाद्विमुक्ता: सन्त ऊर्ध्वमुत्कृष्टं लोकं स्वर्गमपियन्ति। अत्र स्वर्गशब्देन न प्रसिद्धो देवानां लोको ग्राह्य:। तत्रापीतेरसम्भवात्। अत: स्वर्गलोको ब्रह्मैव। न हि ब्रह्मविदां स्वर्ग: कामितो भवेत्। स तु कामिनां लोक इति प्रसिद्ध:॥ ८॥

तस्मिञ्छुक्लमुत नीलमाहु: पिङ्गलं हरितं लोहितं च। एष पन्था ब्रह्मणा हानुवित्त:। तेनैति ब्रह्मवित्पुण्यकृत्तैजसश्च॥ ९॥

मोक्षमार्ग: सूर्य एवेति धिया कथयति तस्मिन्मार्गे सूर्यरूपे बहुविधा रङ्गा: सन्ति। सूर्ये सप्तापि रङ्गा: सन्ति। तानेव निर्दिशति शुक्लं नीलं पिङ्गलं हरितं लोहितं चेत्यादिना। एष पन्था ब्रह्मणा चतुर्मुखेनानुवित्त: परिज्ञात:। तेनैव मार्गेण सूर्यरूपेण ब्रह्मविदपि पुण्यकृदपि तैजसो ब्रह्मतेजस्कोपि एति गच्छति। प्रसङ्गाद्व्याख्याता मयेयं श्रुति:। नात्रास्माकः कश्चनादर इति। नहि मुक्तानां गमनार्थं सोपाना: सन्ति न वा कश्चिन्नियतो लोक:। ये च लोका: प्रसिद्धास्ते कल्पिता एव। न तेषामस्तित्वम्। यथा कश्चन बद्धश्चौर: कारायां निक्षिप्तो दण्डं समाप्य पुन: स्वगृहं गच्छति न तथात्मा कुत्रापि गच्छति। न स कुतोप्यायातोत एव न कुत्रापि गच्छति। शरीरेण सहैव तस्य समाप्तिर्भवति। अन्यथा कथमेकेनैव वर्त्मना ब्रह्मविदोपि गमनं पुण्यकृतोपि तैजसस्येति। यदि तैजस ब्रह्मविदो वा पुण्यकृतो वा विशेषणं तथापि ब्रह्मवित्पुण्यकृतोरपि न समानो मार्ग:॥ ९॥

अन्धं तम: प्रविशन्ति येऽविद्यामुपासते।
ततो भूय इव ते तमो य उ विद्यायां रता:॥१०॥

अत्राविद्याशब्देन कर्म विद्याशब्देन च ज्ञानं ब्रह्मज्ञानं ग्राह्यम्। परं कर्म न सामान्येन गृहीतव्यम्। आविद्यकमेषाविद्यया कृतमेव कर्माविद्याशब्देन ग्राह्यम्। तच्च चौर्यलाम्पट्यकापट्यादिकादिरूपम्। एवं च ये मनुष्या एतादृशीमविद्यामुपासते सेवन्ते तस्यामेव निरता अवतिष्ठन्ते तेन्धं तमो घोरमन्धकारं प्रविशन्ति विनष्टा भवन्तीत्यर्थ:। ये च विद्यायाम् उ एव रतास्ते ततो भूय इव ततोपि भूयस्तम: प्रविशन्ति। अत्र विद्याशब्देन न ब्रह्मविद्यापेक्षिता। केवलं वेदाद्यभ्यासोपयोगीनि शास्त्राण्येवापेक्षितानि। एवं च ये कापट्यक्रौर्यदौर्जन्यादिकं परित्यज्य शास्त्रज्ञानं सम्पाद्य तत्त्वचिन्तका भवन्ति त एवान्धं तमो न पश्यन्तीति तात्त्विकोर्थ:॥ १०॥

अनन्दा नाम ते लोका अन्धेन तमसा वृता:।
तांस्ते प्रेत्याभिगच्छन्त्यविद्वांसोबुधो जना:॥११॥

अविद्वांसस्तत्त्वमे जानाना अत एवाबुधो मूर्खा जना मानवा: प्रेत्य मृत्वा शरीरं परित्यज्य ताँल्लोकान् गच्छन्ति येनन्दा: सन्ति। नन्दयन्तीति नन्दा:। न नन्दा आनन्दा:। किं च ये लोका अन्धेन तमसा वृता वेष्टिता: सन्ति। ते सर्वदा दु:खान्येव प्राप्नुवन्तीतिभाव:॥ ११॥

आत्मानं चेद्विजानीयादयमस्मीति पूरुष:।
किमिच्छन् कस्य कामाय शरीरमनुसंज्वरेत्॥१२॥

यदि पुरुष आत्मा। पुरि शेते तिष्ठतीति पुरुष:। पुर अग्रगमने। तौदादिको धातु:। कुषन् प्रत्यय:। पृषोदरादित्वाद् दीर्घ:। अथवा पूरी आप्यायने। दैवादिक:। बाहुलकात्कुषन्। अयमहमस्मीत्यात्मानं विजानीयात्। अहं पुरुषोस्मि। अग्रगन्तास्मि। सर्वकामानामाप्यायकोस्मि इत्येवं यदि स स्वं परिचिनुयात्तर्हि किमिच्छन् कस्य कामाय कस्मै कामाय शरीरमनुसंज्व-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

रेत्पीडयेत् । अहं त्वाप्तकामोस्मीतिविज्ञायान्यस्य कस्यचित्समीपे कोहमस्मीति विज्ञानार्थं स्वकामप्राप्त्युपायवित्त्यर्थं च गत्वा शरीरायासं नैव कुर्यात् ॥ १२ ॥

यस्यानुवित्तः प्रतिबुद्ध आत्मास्मिन् सन्देह्ये गहने प्रविष्टः । स विश्वकृत्स हि सर्वस्य कर्ता तस्य लोकः स उ लोक एव ॥१३॥

यस्यात्मा य आत्मेत्यर्थः । सन्देह्ये सन्देग्धुं योग्ये गहने विषमेज्ञाने प्रविष्टः सन्, अनुवित्तः सम्यग्ज्ञानवान् प्रतिबुद्धो जागतिकेषु विषयेष्वप्रसक्तः ।

स हि सर्वस्य सुखदुःखप्रियाप्रियेत्यादिरूपस्य जगतः कर्तेति मोहान्मन्वानो विश्वकृद्भवति विश्वं कृन्ततीति विश्वकृत् विश्वच्छेत्ता भवति । तदानीं च तस्य लोकः कल्पितः शत्रुमित्रादिरूपः स उ लोक एव दृष्ट एव कल्पित एवेत्यर्थः । अथवा दृष्ट एव परिज्ञात एव नायं वास्तविको मायया मयैव कल्पितः संकल्पितोस्तीति ॥ १३ ॥

इहैव सन्तोथ विद्मस्तद्वयं न चेदवेदिर्महती विनष्टिः । ये तद्विदुरमृतास्ते भवन्त्यथेतरे दुःखमेवापियन्ति ॥१४॥

इहैवस्मिन्नेव शरीरे । अस्मिन्नेव संसारे वा । वयं तद्विद्मः । अस्माभिस्तद्विज्ञातव्यमित्याशयः । न चेदवेदिर्यदित्वं तन्नावेदीः । ह्रस्वत्वमार्षम् । महती विनष्टिर्महान् हि विनाश उपस्थितः स्यात् । ये च तद्विदुस्तदात्मस्वरूपं विद्युर्जानीयुस्तेमृता भवन्ति सर्वक्लेशपारगा भवन्ति । अथेतरेज्ञानिन जगत्येव स्वशिवं पश्यन्तो दुःखमेवापियन्ति दुःखेप्यया भवन्ति दुःखनिमग्ना भवन्तीत्याशयः । न चेदवेदिरित्यत्र निरुक्ते न चेदवेदीरित्येव पपाठ यास्काचार्यः । एवं च वेदनं वेदः । वेदोस्यास्तीति वेदी । वेद्येव वेदिर्नवेदिरवेदिरिति महापर्वतारोहणक्लेशो नादर्तव्यः ॥ १४ ॥

यदैतमनुपश्यत्यात्मानं देवमञ्जसा ।
ईशानं भूतभव्यस्य न ततो विजुगुप्सते ॥१५॥

आत्मज्ञानं प्रशंसति । यदा स आत्मा शरीरस्थो शरीरभूतो वात्मानं देवं दिव्यगुणविशिष्टं न पापिष्ठम्, भूतभव्यस्य भूतस्य भविष्यतश्च पदार्थजातस्येशानमीशनकर्तारमात्मानमेवाञ्जसा पश्यति विजानाति ततस्तदनन्तरं न विगुप्सते न कमप्यन्यं निन्दति । मोहादेवात्मानं विस्मृतवान् ततो दुःखाय भवति । यदा च स्वरूपं पश्यति तदा न विजुगुप्सते नान्यं नवात्मानं निन्दतीति भावः । स्वरूपाज्ञानं हि निन्दाप्रवर्तकमितियावत् ॥ १५ ॥

यस्मादर्वाक्संवत्सरोहोभिः परिवर्तते । तद्देवा ज्योतिषां ज्योतिरायुर्होपासतेमृतम् ॥ १६ ॥

अर्वागित्यव्ययपदम् । सर्वथेत्यस्यार्थः । यस्माद्ब्रह्मणोहोभिः सह संवत्सरोर्वाक् परिवर्तते तज्ज्योतिषामपि ज्योतिः प्रकाशकमायुः सर्वगममृतं मृतिरहितं ब्रह्म देवा विद्वांस उपासते तदाज्ञाकारिणो भवन्तीत्यर्थः । नात्रास्ति किञ्चिद्विशिष्टं तत्त्वज्ञानम् ॥ १६ ॥

यस्मिन् पञ्च पञ्चजना आकाशश्च प्रतिष्ठितः । तमेव मन्य आत्मानं विद्वान् ब्रह्मामृतोमृतम् ॥ १७ ॥

यस्मिन् पञ्च पञ्जजना आकाशश्च प्रतिष्ठितास्तमेवात्मानं मन्ये । तमेवामृतं ब्रह्म मन्ये । नाहं मूर्खः, विद्वान् । एवं नाहं मृतिधर्मा किन्त्वमृतोमरणधर्मा । नात्रापि विशिष्टं तत्त्वज्ञानम् ॥१७॥

प्राणस्य प्राणमुत चक्षुषश्चक्षुरुत श्रोत्रस्य श्रोत्रं मनसो ये मनो विदुः । ते निचिक्युर्ब्रह्म पुराणमग्र्यम् ॥ १८ ॥

ये ब्रह्मतत्त्वमेवं विदुर्जानन्ति, कीदृशम् ? प्राणस्यापि प्राणं चक्षुषोपि चक्षुः श्रोत्रस्य श्रोत्रं मनसश्च मनः । ते पुराणं बहोःकालात्प्रख्यातमग्र्यं श्रेष्ठं ब्रह्म निचिक्युर्निश्चितवन्तः । प्राणनं दर्शनं श्रवणं मननं सर्वं ब्रह्मसामर्थ्याद्भवतीत्येवं ये निश्चितवन्तस्ते ब्रह्म जानन्ति ॥ १८ ॥

मनसैवानुद्रष्टव्यं नेह नानास्ति किञ्चन । मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति ॥ १९ ॥

प्रकरणप्रस्तुतब्रह्मदर्शनमनुविधीयतेनेन श्लोकेन । तद् ब्रह्म मनसैवानुद्रष्टव्यम् । नास्त्यन्यत्साधनं तद्दर्शनस्य । ननु मनसो मन इत्युक्तत्वात्तस्य मनोपेक्षया श्रेष्ठत्वमुपपाद्य कथयत्र मनसैवानुद्रष्टव्यमिति वदति ? बाढं वदति । मनसोपेक्षया सूक्ष्ममपि तन्मनसैवानुद्रष्टुं शक्यते । अङ्गुल्याः सूक्ष्ममपि वस्त्वङ्गुलिभिरेव गृह्यते । हस्तात्सूक्ष्ममपि वस्तु हस्तेनैवोत्थाप्यते । मनोपेक्षया सूक्ष्ममपि वस्तु मनसैवानुदृश्यते । दर्शनमनुदर्शनं वा

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

घटदर्शनमिव न प्रत्येयम् । अत्रानुदर्शनमनुभवः । न तत्साक्षात्कारेन्यानीन्द्रियाणि समर्थानीति यावत् । अथसैवकारो भिन्नक्रमः । मनसानुद्रष्टव्यमेवेत्यन्वयः । अथवा मनसा तदेवानुद्रष्टव्यमिति । अथवा मनसैवानुद्रष्टव्यमित्येव समीचीनोन्वयः । कुतो मनसैव द्रष्टव्यमित्यत आह इह किञ्चन नाना ब्रह्मेत्यध्याहृत्य ब्रह्म विनेत्यर्थः । नानेति विनार्थे । नाना नारी निष्फला लोकयात्रेति लोकेपि प्रसिद्धिः । ब्रह्मान्तरेणेह किञ्चन नास्ति । अतो ब्रह्मैव मनसानुभवनीयमिती श्लोकहृदयम् । यश्चेह ना मनुष्यः, अना मनुष्यातिरिक्तः प्राणी, पश्यति, अयं मनुष्योयं च पशुरित्येवं पश्यति स मृत्योर्मृत्युमाप्नोति । पुनः पुनर्जायते म्रियते च स इतिभावः । सर्वं ब्रह्मैव । न ना न चाना । इवेत्यनेनाभिहितत्वात् ना अना इत्यत्र न द्वितीया । भेददर्शनं परित्यज्य सर्वत्र ब्रह्मदर्शनमेव कर्तव्यमितिभावः ॥१९॥

एकधैवानुद्रष्टव्यमेतदप्रमेयं ध्रुवम् । विरजः पर आकाशादज आत्मा महान्ध्रुव ॥ २० ॥

अप्रमेयमप्रमेय ध्रुवं निश्चलं चैतद्ब्रह्मैकधैवैकमेवानुद्रष्टव्यं विज्ञातव्यम् । अत्र धाप्रत्ययो निरर्थकः । प्रकारे हि धा भवति । नास्ति ब्रह्मणः कञ्चन प्रकारः । प्रकारवांश्च विनश्यत्स्वरूपो भवति । न तु तथा ब्रह्म । एकमेव ब्रह्मातएवाप्रमेयमत एव च ध्रुवम् । प्रमाणैरपि न तन्मीयते । न तत्र वागगच्छतीति प्रतिषेधात् यद्धि मीयते तत्तु काल्पनिकं ब्रह्म । औपनिषदस्य ब्रह्मणो निर्गुणत्वान्न गुणैस्तत्परिचीयते । नीरूपत्वान्न रूपवन्निरूप्यते । व्यापकत्वान्न तु परिमाणेनापि परिमीयते । पूर्वार्धेन ब्रह्मोपवर्ण्योत्तरार्धेनात्मा निर्वर्ण्यते—विरजो रजोगुणात्पर आकाशादपि परोजोजन्मा महान् ध्रुवो नित्यश्चात्मा । अत्र महानित्युक्त्यात्मनो महत्परिमाणं विद्योतितं भवति । अणुरेष आत्मेत्यत्राणुशब्दो नाणुपरिमाणत्वमात्मनो निवेदयति, केवलं सूक्ष्मत्वं प्रकाशयति ॥ २० ॥

तमेव धीरो विज्ञाय प्रज्ञां कुर्वीत ब्राह्मणः । नानुध्यायाद् बहूञ्छब्दान्वाचो विग्लापनं हि तदिति ॥ २१ ॥

धीरो बुद्धिवैभवयुक्तो ब्राह्मणो ब्रह्मान्वेषणपरायणस्तमेवात्मानं विज्ञाय प्रज्ञां स्थिरामितिशेषः । कुर्वीत । आत्मज्ञानायैवात्मनः प्रयत्नः प्रवृत्तः । विज्ञाते च तस्मिन् प्रज्ञा स्थिरा कर्तव्या । बहूञ्शब्दाञ्शास्त्रीयानन्यैः प्रोक्तान्वा नानुध्यायान्न बहु मन्वीत । यतस्तत्सर्वं वाचो विग्लापनं हि वाङ्निपीडनमेव । एतावत्पर्यन्तं कुत्रचित्पठिताः श्लोकाः श्राविताः । अतः परं पुनरुपनिषदारम्भः श्लोकान्त इतिशब्दस्तेषां श्लोकानां समाप्तिसूचनार्थमेव प्रयुक्तः ॥२१॥

स वा एष महानज आत्मा योयं विज्ञानमयः । प्राणेषु य एषोन्तर्हृदय आकाशस्तस्मिञ्शेते ॥

योयमात्मा विज्ञानमयः सन् प्राणेषु तिष्ठति, य एष आकाशः सन् प्रकाशरूपः सन् हृदये तस्मिञ्शेते तिष्ठति । स एष महान् महत्परिमाणोजोजन्मात्मा । प्राणशब्दोत्रेन्द्रियवाचकः । सर्वेष्वेव ज्ञानेन्द्रियेषु स विज्ञानमयः । स्वप्रेरणां स्थापयति । स एव हृदयाभ्यन्तरे शेते निवसति ॥

सर्वस्य वशी सर्वस्येशानः सर्वस्याधिपतिः ।

स आत्मा सर्वस्येन्द्रियगणस्य वशी । सर्वस्येशानः सर्वस्येशनकर्ता । सर्वस्य द्विविधेन्द्रियगणस्य मनसश्च स एवाधिपतिः ।

स न साधुना कर्मणा भूयान्नो एवासाधुना कनीयान् ।

स आत्मा साधुना कर्मणा कृतेनेत्यर्थः । न भूयान् भवति न वर्धते । नो एवासाधुना कर्मणा कनीयान् भवत्यल्पतां गच्छति । कुतो न भूयान्भवति कुतो न कनीयानिति प्रश्नस्योत्तरं केवलमेतदेव "न स साध्वसाधु वा कर्म करोति । कर्मकर्तृत्वमन्तःकरणस्य । आत्मा ततोस्पृष्टः । एतेनेदमपि ध्वनितं भवति नास्ति कश्चन नित्यो नियतश्चात्मा । यथान्तःकरणं जायते तथैवात्मापि जायते । उभयमपि समानरूपेण विनश्यतः । न चेदानीमेवोक्तं "स वा एष महानज आत्मेति" इत्यादि न तस्याजत्वम् । बाढमुक्तम् । न च मानव इव गर्भात्स उत्पद्यते शरीरेण सदैव यथा मन आदीनामुत्पत्तिस्तथैव तस्यापीति तथोक्तम् । शरीररचनासमये जायमानं चैतन्यमेवात्मा । नान्यः कञ्चनात्मा नाम । स एव शक्तिरूपेण प्राणेषु तिष्ठति हृदयेपि । तत्सम्बन्धेनैव साध्वसाधु च कर्म प्रवर्तते तेन च नाम्ना संश्लिष्यति ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

एष सर्वेश्वर एष भूताधिपतिरेष भूतपाल एष सेतुर्विधरण एषां लोकानामसम्भेदाय ॥

सर्वं स्पष्टम् ॥

तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसानाशकेन ॥

ब्राह्मणा ब्रह्मान्वेषणशीला वेदानुवचने वेदाध्ययनेन वेदाध्यापनेन वा वेदानुशीलनेन वा यज्ञेन वा दानेन वा नाशकेनोपवासेन। अनशनमनाशकम्। अश भोजने। तमेतमात्मानं विविदिषन्ति वेत्तुमिच्छन्ति। एतैः साधनैस्ते तं न विदन्तीत्यन्यत्।

एतमेव विदित्वा मुनिर्भवति।

एतमात्मानमेव विदित्वा विज्ञाय सर्वो मुनिर्मननशीलो भवति। मुनिभवने एतदात्मज्ञानमेव हेतुरिति। आत्मज्ञानवान्न कदापि न भवति कर्मीति ॥

एतमेव प्रव्राजिनो लोकमिच्छन्तः प्रव्रजन्ति ॥

एतमेव लोकमात्मलोकमिति यावत्। इच्छन्तः प्रव्राजिनः प्रव्रज्यावन्तः प्रव्रजन्ति। पटं वयेतिवत्प्रव्राजिनः प्रव्रजन्तीति प्रयोगः ॥

एतद्ध स्म वै तत्। पूर्वे विद्वांसः प्रजां न कामयन्ते। किं प्रजया करिष्यामो येषां नोयमात्मायं लोक इति ॥

एतद् ह स्म वै तत् इतिशब्दपञ्चकेन प्रव्रजन्तीतिपदस्यैव व्याचिख्यासा बोध्यते। अथ ना ब्राह्मणग्रन्थानां परिपाटी खल्वियं निरर्थकानां शब्दानामुच्चारणमिति। ननु नायं ग्रन्थो ब्राह्मणम्, उपनिषत्खल्वियम्। बाढमुपनिषत्। ब्राह्मणान्तर्गतैवैषा। अस्या आदौ ब्राह्मणम्, मध्ये ब्राह्मणम्, अन्ते च ब्राह्मणम्। क्वचित्क्वचिदुनिषद्। अस्तु। पूर्वे विद्वांसः प्रजां न कामयन्ते स्मेतिशेषः। कुतो न प्रजामकामयन्त? हेतुमाह—प्रजया किं करिष्यामः कं लाभं लप्स्यामह इति। नास्ति प्रजया कोपि लाभः। उत्पादनं संवर्धनं लालनं पालनं पाठनं पाठने द्रव्यव्ययः, अनारोग्येपि धनव्ययो मनोहानिः। एवं चानेके दोषाः प्रजोत्पादने। इत्यवधार्य ब्रूते किं प्रजया करिष्यामः? येषां नोस्माकमयमात्मैवायं लोक प्रसिद्धो लोकः। लोके बहवो लोकाः भूर्भुवःस्वरित्याद्याः प्रसिद्धाः। तांल्लोकान्कामयमाना एव प्रजामुत्पादयन्ति संसरन्ति च। अस्माकं ज्ञानिनां तु अयमेवात्मैव लोकः। आत्मलोकादतिरिक्तं लोकं न जानीमो न परिचिनुम इति ॥

ते ह स्म पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्युत्थायाथ भिक्षाचर्यं चरन्ति। या ह्येव पुत्रैषणा सा वित्तैषणा। या वित्तैषणा सा लोकैषणा। उभे एते एषणे एव भवतः ॥

ते प्रव्राजिनः पुत्रवित्तलोकैषणाभ्यो व्युत्थाय पृथग्भूय भिक्षाचर्यं चरन्ति परित्यक्तगृहा भवन्ति। नात्रान्यत्किञ्चित्तिरोहितम् ॥

स एष नेति नेत्यात्मागृह्यो नहि गृह्यतेशीर्यो न हि शीर्यतेसङ्गो नहि सज्जतेसितो न व्यथते न रिष्यति ॥

इति प्रकारः। स एष आत्मा नेति नेति तस्य कश्चन प्रकारो नास्तीत्यगृह्यः। सोगृह्योत एव न हि गृह्यते केनापि साधनेन। अशीर्योपि स न शीर्यते। शॄविशरणे। असङ्गो हि सोत एव न सज्जते कुत्रापि। असतोबद्धः षिञ् बन्धने। अतएव न व्यथते न च रिष्यति। रिष हिंसायाम्। बद्ध एव व्यथामनुभवति ॥

एतमु हैवैते न तरत इत्यतः पापमकरवमित्यतः कल्याणमकरवमित्युभे ॥

एतमात्मनं सर्वैषणानिवृत्तमेते न तरतः प्राप्नुतः। एते के? अतो यस्मात्कस्माच्च कारणादहं पापमकरवमिति, अतश्च कल्याणं पुण्यमकरवमिति उभे चिन्ते। स खलु वीतपापपुण्यचितिः ॥

उ हैवैष एते तरति। नैनं कृताकृते तपतः ॥२२॥

इदं पापमिदं च पुण्यमिति लौकिकानां विचारधारा। तत्त्वज्ञानानां तु जगतोसबन्धाद्धेतोर्न तादृग्विचारः। अयमाशयः—किं पापं किं चापापमित्याद्यावध्यनवधारितस्वरूपमेव। लोके पापं पुण्यं च कल्पितमेव। अत एवैकेन पापत्वेनाभिमतं कर्मान्येन पुण्यत्वेन गृह्यते। अन्येन च पुण्यत्वेनाभिमतं कर्म पापत्वेन गृह्यते। अतोनवस्थितैव पुण्यपापधीधारा। लौकिकीं प्रथामनुसरतां सर्वं दुःखमेव भवति। तां परित्यजन्सर्वदुःखविमुक्तो भवत्यात्मेत्याह—एष आत्मैते पुण्यपापे तरति। दुष्ट-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

धियैव सम्पादित कर्म पापमित्युच्यते। परोपकारधिया सम्पादितं कर्म पुण्यमित्युच्यते। ज्ञानदृष्टिर्हि ज्ञानिनं पुनात्येव। पूतमतस्तं दुष्टधीर्न समवैति। इदं पापमिति-धियमिदं पुण्यमितिधियं च तत्त्वज्ञो न स्पृशति। पुण्यपापयोरप्यनिश्चितत्त्वात्। अतएव नैनं ज्ञानिन-मात्मान कृताकृते तपत इदं पापमाचरितमयं च धर्मो नाचरित इत्येवं रूपे तपतः सन्तापयतः॥ २२॥

तदेतदृचाभ्युक्तम्—

एष नित्यो महिमा ब्राह्मणस्य
न वर्धते कर्मणा नो कनीयान्।
तस्यैव स्यात्पदवित्तं विदित्वा
न लिप्यते कर्मणा पापकेनेति॥

उपरि यदुक्तं ब्राह्मणे न तदेवर्चा समर्थ्यते। ब्राह्मणस्य ब्रह्मज्ञानिन एष महिमा माहात्म्यमेतन्नित्यो नित्यम्। अतएव कर्मणा शुभेन स महिमा न वर्धते, अशुभेन च कर्मणा नो कनीयान् भवति। नहि कर्मणा तस्य सङ्गो भवतीति भावः। अन्तःकरणं त्ववश्यं मलि-नममलिनं भवति। तस्यैव ब्रह्मण एव पदवित् स्यात्, पद्यते प्राप्यत इति पदं स्वरूपं ब्रह्मरूपमिति यावत् तद्वित्तज्ज्ञः स्यात्। किं स्यात्तज्ज्ञानेनेत्याह—तं विदित्वा कर्मणा न लिप्यते। पापकेनेत्यनेनाशुभेन शुभेन चेति ग्राह्यम्। पुण्यं वा स्यात्पापं वा स्यात्सर्वविधं कर्म-बन्धायैव भवतीतिमतमुपनिषदाम्। स्वरूपविदो न बध्यते कर्मबन्धनेनेतिभावः॥

तस्मादेवंविच्छान्तो दान्त उपरतस्तितिक्षुः समाहितो भूत्वात्यन्येवात्मानं पश्यति सर्वमात्मानं पश्यति।

पदवित्तं विदित्वा न लिप्यते कर्मणा पापकेनेत्यु-क्तम्। तस्मादेवंवित् तत्त्वज्ञानी शान्तः शमान्वितो दान्तो दमान्वित उपरतः सर्वैषणाविनिर्मुक्तस्तितिक्षुः सर्वद्वन्द्वसहिष्णुः समाहित इन्द्रियव्यापारापराधीनो भूत्वात्मन्येवात्मानं पश्यति सर्वं चात्मानं पश्यति। ननु आत्मन्येवात्मानं पश्यतीत्यस्य वाक्यस्य कोर्थोभिप्रेतः स्यात्? उच्यते। नह्यन्यः कश्चनाधार आत्मन इति-भावः। एतावता ब्रह्म कश्चिदीश्वरो वा तदाधार इति मतमवमतं भवति। तदेव स्पष्टयति—सर्वमात्मानं पश्यति। आत्मेतरत्किञ्चिदपि न पश्यतीत्यर्थः। सर्वजीवेष्वात्मस्वरूपमेव पश्यति न पार्थक्यम्। घटपटादिषु विषयेषु तु नात्मबुद्धिः। जडेष्वप्यात्मबुद्धि-र्जडत्वाय कल्पेत। शान्तो दान्त उपरतस्तितिक्षुः समा-हितो भूत्वेत्यादिविशेषणसमूहेनात्मा यावद्देहं देहोपयो-गीनि लोकोपयोगीनि च कर्माणि न परित्यजेदिति प्रति-पादितं भवति। रागद्वेषादिदोषोत्पत्तिर्भेदधिया भवतीति सिद्धान्तः। अयमस्मदनुकूल इति रागः प्रवर्तते। अय-मस्मत्प्रतिकूल इति द्वेषः प्रवर्वते। आनुकूल्यप्रातिकूल्य-प्रतीतिर्भेदनियामिका। भेदो दुःखहेतुः। तस्मात्स हेयः। शरीरधर्मनिर्वाहाय तु कर्मजातमावश्यकमवश्यं कर्त-व्यमिति॥-

नैनं पाप्मा तरति। सर्वं पाप्मानं तरति।
नैनं पाप्मा तपति। सर्वं पाप्मानं तपति।

एतादृशं ज्ञानसम्पन्नमात्मानं पाप्मा पापं न तरति नाक्राम्यति। स च सर्वं पाप्मानं तरति क्राम्यति। सर्व-स्मात्पापनिचयादस्पृष्टो भवतीत्याशयः। एवं नैनं पापं तपति परं सर्वं पापं स आत्मा तपति तापयति।

विपापो विरजोविचिकित्सो ब्राह्मणो भवति।

एवं विपापो विगतपापो विरजो रजोगुणरहितो विचिकित्सो निखिलसंकल्पविकल्पसंशयशून्य आत्मा ब्राह्मणो ब्रह्मवेत्ता भवति॥

एषः ब्रह्मलोकः सम्राट्। एनं प्रापितोसीति होवाच याज्ञवल्क्यः।

एष ब्रह्मलोको ब्रह्मदर्शनं ब्रह्मज्ञानमितियावत्। सम्राट् सम्यग्राजते इति सम्राट्। एतादृशं ब्रह्मज्ञानमेव सर्वप्रकाशहेतुः। एनं ब्रह्मलोकमेनद्ब्रह्म प्रापितोसि दर्शितोसीति याज्ञवल्क्य जनकमुवाच॥

सोहं भगवते विदेहान्ददामि मां चापि सह दास्यायेति॥ २३॥

लब्धात्मकामः प्रीतश्च याज्ञवल्क्य उवाच भगवते तत्त्वज्ञानोपदेशकाय विदेहान्ददामि यावन्मम राज्यं तावत्सर्वं ददामि। न केवलमेतदेव, सहैव मामपि तुभ्यं ददामि। ननु कोर्थस्त्वया म इति? दास्यायेति। अहं तव दास्यं धास्यामि। सर्वामेव परिचर्यां करिष्या-मीति यावत्॥ २३॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

स वा एष महानज आत्मान्नादो वसुदानः। विन्दते य एवं वेद ॥

ब्राह्मणमेतत्।

स वा एषः महानज आत्माजरोमरोमृतोमयः। ब्रह्माभयं वै ब्रह्माभयं हि वै। ब्रह्म भवति य एवं वेद ॥ २५ ॥

पापपुण्यभीधीविमुक्तः स एष आत्मा महानजोजन्माजरो जरारहितोमरो मृत्युरहितोतोमृतो न कदापि मरणमापन्नः। यतो ब्रह्माभयं भयरहितमस्ति, अतो यो वै अभयो भवति ब्रह्मैव भवति। ब्रह्माभयं ब्रह्माभयमितिद्विरुक्तिर्दार्ढ्यर्था ॥

इति बृहदारण्यके चतुर्थेध्याये चतुर्थं ब्राह्मणम्

बृहदारण्यके चतुर्थाध्याये पञ्चमं ब्राह्मणम्

(मैत्रेयी ब्राह्मणम्)

अथ ह याज्ञवल्क्यस्य द्वे भार्ये बभूवतुर्मैत्रेयी कात्यायनी च। तयोर्ह मैत्रेयी ब्रह्मवादिनी बभूव। स्त्रीप्रज्ञैव तर्हि कात्यायनी ॥

ब्रह्मवादिनी ब्रह्मवदनशीला मुक्तिमार्गानुयायिनी विरक्तेत्यर्थः। स्त्रीप्रज्ञा गृहकार्यकुशला संसारान्वयिनीत्यर्थः। अन्यत्स्पष्टम् ॥

अथ ह याज्ञवल्क्योन्यद्वृत्तमुपाकरिष्यन् ॥ १ ॥

याज्ञवल्क्यश्च गार्हस्थ्यधर्मावसानेन्यद्वृत्तं पारिव्राज्यमुपाकरिष्यन्। स्वीचिकीर्षिष्यन् आस्त ॥ १ ॥

मैत्रेयीति होवाच याज्ञवल्क्यः प्रव्रजिष्यन्वा अरेहमस्मात्स्थानादस्मि। हन्त तेनया कात्यायन्यान्तं करवाणीति ॥ २ ॥

याज्ञवल्क्यो मैत्रेयीमुवाच मैत्रेयि प्रव्रजिष्यन्नहमस्मात्स्थानादस्मि गार्हस्थ्याद्विरक्तोहं प्रव्रज्यां जिघृक्षामीत्यर्थः। हन्तेति सम्बोधनार्थकमव्ययम्। अनया कात्यायन्या सह ते तव सङ्गस्यान्तं करवाणि करोमीति करवाणीति लोण्नानुज्ञायाम्। ज्ञाते वैराग्ये कस्यचित्कस्याश्चिद्वा नानुज्ञार्थंकरी ॥ २ ॥

सा होवाच मैत्रेयी यन्नु म इयं भगोः सर्वा पृथिवी वित्तेन पूर्णा स्यात्स्यां न्वहं तेनामृताहो नेति। नेति होवाच याज्ञवल्क्यः। यथैवोपकरणवतां जीवितं तथैव ते जीवितं स्यात्। अमृतत्वस्य तु नाशास्ति वित्तेनेति ॥ ३ ॥

न सा मैत्रेयी पत्युः पथि विघ्नं चिकीर्षति स्म। तद्वर्त्मनि तत्प्रोत्साहनार्थं पृच्छति स्म। भगो इति सम्बोधनार्थकमव्ययम्। यदि सर्वा पृथिवी वित्तेन पूर्णा स्यात्साच मदीयैव स्यात्, तदा स्यामहममृता तेन वित्तेनामृतेति। नेतिं होवाच याज्ञवल्क्यः। अन्यदप्युक्तं तेन यथान्येषामुपकरणवतां जीवितं कष्टमयं भवति तथैव तेपि तत्स्यात्। वित्तेन तु नास्त्याशामृतत्वस्यापुनर्जन्मनो मोक्षस्य वेति ॥ ३ ॥

सा होवाच मैत्रेयी येनाहं नामृता स्यां किमहं तेन कुर्याम्। यदेव भगवान्वेद तदेव मे ब्रूहीति ॥ ४ ॥

स्पष्टम् ॥ ४ ॥

स होवाच याज्ञवल्क्यः प्रिया वै खलु नो भवति सती। प्रियमवृधत्। हन्त तर्हि भवत्येतद्व्याख्यास्यामि। व्याचक्षाणस्य तु मे निदिध्यासस्वेति ॥ ५ ॥

तुष्टो याज्ञवल्क्य उवाच—प्रिया नोस्माकं भवति सती भवती। प्रियमवृधन्ममेतिशेषः। एतेन त्वत्प्रश्नेन मे प्रेमवृद्धिर्जातेत्यर्थः। अथवान्तर्भावितण्यर्थः। प्रियं मम वर्धितवती। हन्तेति हर्षे। तर्हि भवति व्याख्यास्याम्येतद्यत्त्वं पृष्टवती। व्याचक्षाणस्य मे त्वं निदिध्यासस्व सध्यानं शृण्वत्यर्थः ॥ ५ ॥

स होवाच। न वा अरे पत्युः कामाय पतिः प्रियो भवति। न वा अरे जायायै कामाय जाया प्रिया भवति। न वा अरे पुत्राणां कामाय पुत्राः प्रिया भवन्ति। न वा अरे वित्तस्य कामाय वित्तं प्रियं भवति। न वा अरे पशूनां कामाय पशवः प्रिया भवन्ति। न वा अरे ब्राह्मणः कामाय ब्रह्म प्रियं भवति। न वा अरे क्षत्रस्य कामाय क्षत्रं प्रियं भवति। न वा अरे लोकानां कामाय लोकाः प्रिया भवन्ति। न वा अरे देवानां कामाय देवाः प्रिया भवन्ति। न वा अरे वेदानां कामाय वेदाः प्रिया भवन्ति। न वा अरे भूतानां कामाय भूतानि प्रियाणि भवन्ति। न वा अरे

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सर्वस्य कामाय सर्वं प्रियं भवति। आत्मनस्तु कामाय सर्वं प्रियं भवति ॥

जायार्थे इति चतुर्थी षष्ठ्यर्थे। ब्रह्मण इत्यस्य ब्राह्मणस्येत्यर्थः। क्षत्रस्य साहचर्यात्। वेदानां कामायेत्युक्त्यावगम्यत उपनिषत्कालेपि वेदानां प्रियत्वमासीदेव। बहु परिगणयन् श्राम्यन्नाहं सर्वस्य कामाय सर्वमिति। अन्यत्सुस्पष्टम् ॥

आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः। मैत्रेय्यात्मनि खल्वरे दृष्टे श्रुते मते विज्ञात इदं सर्वं विदितम् ॥ ६ ॥

जागतिकः सर्व एव सम्बन्धी निरर्थक आत्मकल्याणाय। आत्मकल्याणार्थिभिस्तु आत्मैव द्रष्टव्यः स एव मन्तव्यः स एव निदिध्यासितव्यश्च। आत्मातिरिक्तवस्तुमात्रस्य तुच्छत्वं द्योतयितुमाह मैत्रेयि केवलमात्मनि दृष्टे सर्वं दृष्टं भवति श्रुते सर्वं श्रुतं भवति मते सर्वं मतं भवति विज्ञाते सर्वं विज्ञातं भवति। इदमिति जगन्निर्देशकम्। आत्मज्ञाने सति जाते सर्व एव सांसारिकाः पदार्थास्तुच्छत्वं यान्तीत्याशयः ॥ ६ ॥

ब्रह्म तं परादाद् योन्यत्रात्मनो ब्रह्म वेद। क्षत्त्रं तं परादाद् योन्यत्रात्मनः क्षत्त्रं वेद। लोकास्तं परादुर्योन्यत्रात्मनो लोकान्वेद। देवास्तं परादुर्योन्यत्रात्मनो देवान्वेद। वेदास्तं परादुर्योन्यत्रात्मनो वेदान्वेद। भूतानि तं परादुर्योन्यत्रात्मनो भूतानि वेद। सर्वं तं परादाद् योन्यत्रात्मनः सर्वं वेद। इदं ब्रह्म, इदं क्षत्त्रम्, इमे लोकाः, इमे देवाः, इमानि भूतानि, इदं सर्वं यदयमात्मा ॥ ७ ॥

आत्मनोतिरिक्तं ब्रह्म यो वेद तं ब्राह्मणक्षत्रियादयः सर्वे परादुः पराकुर्युः ब्रह्मप्राप्त्ययोग्यं कुर्युरित्यर्थः। आत्मैव ब्रह्म। नात्मातिरिक्तं किञ्चिद्ब्रह्मेति हार्दमत्र। वेदानामात्मानतिरिक्तत्वं ज्ञानत्वेनैव। वेदानामपि ज्ञानस्वरूपता तथैव यथात्मनः। ब्राह्मणक्षत्रियलोकदेव वेदभूतादयः सर्वेपि नात्मनोतिरिच्यते इति भावः। जात आत्मज्ञाने सर्वं एवैते निरर्थका एवेतितात्पर्यम् ॥ ७ ॥

स यथा दुन्दुभेर्हन्यमानस्य न बाह्याञ्छब्दाञ्छक्नुयाद्ग्रहणाय, दुन्दुभेस्तु ग्रहणेन दुन्दुभ्याघातस्य वा शब्दो गृहीतः ॥ ८ ॥

स यथा शङ्खस्य ध्मायमानस्य न बाह्याञ्छब्दाञ्छक्नुयाद्ग्रहणाय, शङ्खस्य तु ग्रहणेन शङ्खध्मस्य वा शब्दो गृहीतः ॥ ९ ॥

स यथा वीणायै वाद्यमानायै न बाह्याञ्छब्दाञ्छक्नुयाद्ग्रहणाय वीणायै तु ग्रहणेन वीणावादस्य वा शब्दो गृहीतः ॥ १० ॥

स यथार्द्रैधाग्नेरभ्याहितस्य पृथग्धूमा विनिश्चरन्त्येवं वा अरे महतो भूतस्य निश्वसितमेतद् यद् ऋग्वेदो यजुर्वेदः सामवेदोथर्वाङ्गिरस इतिहासपुराणं विद्या उपनिषदः श्लोकाः सूत्राण्यनुव्याख्यानानि व्याख्यानानीष्टं हुतमाशितं पायितमयं च लोकः परश्च लोकः सर्वाणि च भूतान्यस्यैवैतानि सर्वाणि निश्वसितानि ॥ ११ ॥

अभ्याहितस्य स्थापितस्य। आर्द्रैधाग्नेः पृथग्धूमा निश्चरन्तीत्युक्त्याग्नेर्विशेषणमार्द्रैधामिति ततश्च पृथग्धूमा इति चोक्तम्। एवं ऋग्वेदादयो महतो भूतस्य निश्वसितमित्युक्तम्। अग्नेः पृथग्धूमा इतिकथनं प्रत्यक्षविरुद्धम्। न ह्यग्निधूमयोर्विनिश्चरणकाले पार्थक्यमवलोकितं भवति। ऋग्वेदाद्यास्तु पृथगेवावलोक्यन्ते। न महता भूतेन सह तेषां कोपि सम्बन्धः प्रतीयते। इदमेकं वैषम्यम्। तस्य महतो भूतस्य केनापि दर्शनमपि न कृतम्। अग्निधूमयोरुभयोरेव प्रत्यक्षं सर्वैरेव दर्शनं क्रियते। इदं द्वितीयं वैषम्यम्। उभयोरेवाग्निधूमयोर्भूतत्वं महतो भूतस्यर्ग्वेदादीनां च न तथा। एकं चेतनमन्यानि चाचेतनानि। इदं तृतीयं वैषम्यम्। अग्निधूमयोरुभयोर्भूतजन्यत्वम्। अत्र च न तथेतीदं चतुर्थं वैषम्यम्। एवं च दृष्टान्तदार्ष्टान्तिकयोः सत्यपि महति भेदे स्वीकर्तव्यमिदं सर्वा विद्याः सर्वं च जगत् महती भूतस्यैव निश्वसितानि—अनायासेनैव महता भूतेनोत्पादितानीति। ननु महद्भूतमत्र ब्रह्मैव वान्यत्किञ्चिद्वा ? यदि ब्रह्मैव कथं तस्य भूतत्वम्। तद्यन्यत्किञ्चन तत्किमितित्यन्वेषणीयम्। तच्चेतनं वाचेतनं वा ? नह्यचेतनाद्विद्यानां

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सर्वासां प्रभवो भवितुमर्हति। पारिशेष्याद्यदि तच्चेतनमेव तर्हि तत्सावयवं निरवयवं वा ? न निरवयवम् निश्वसितत्वाभावात्। न सावयवम्। तद्विनाशप्रसङ्गात्। अन्यदपि किञ्चिद्विचारणीयमत्र। आग्नेवाय्वादित्याङ्गिरस एते चत्वार ऋषयश्चतुर्णां वेदानां प्रभवस्थानम्। कथं तर्ह्यथर्वाङ्गिरस इव ऋगाग्नेय-इत्यादि नोक्तम्। उपनिषदामपि वेदत्वमितिसामान्योद्घोषः। कथं तर्ह्यथर्वाङ्गिरस इत्युक्तेरनन्तरमेवोपनिषत्परिगणनम्। एतेषां सर्वेषां प्रश्नानामेकमेवोत्तरम् इदं सर्वं ब्राह्मणमेव नोपनिषदिति। ब्राह्मणानि बहुवादीनि भवन्ति। बहुवादिनां वचनं न सर्वथा प्रत्येतव्यं भवति। अतएव हुतमाशितं पायितमित्यादिवचनानि समाधेयानि भवन्ति। हुतं हवनम् अशितमशनं पायित पानमित्यर्थानामङ्गीकारेपि न किञ्चिन्नावीन्यं प्रतिभाति। ननु किमिदं महद्भूतमिति। यदि ब्रह्मैव कथं भूतमिति। यदभवत्तद्भूतम्। नामवद्ब्रह्म ततो न तद्भूतमपि। एवं च भूतमित्यत्र न भूतार्थे निष्ठा। अन्य एवौणादिकस्तः। भावयतीति भूतम्। अत एव तस्य महत्त्वमपि साधितं भवति। एवं च महद्भूतं ब्रह्मैव न प्रसिद्धं जगदुपादानं भूतपञ्चकमिति। एतानि सर्वाणि महतो भूतादुत्पन्नानीति नोक्तमत्र। महतो भूतस्य निश्वसितमित्येवोक्तम्। सम्वन्धसामान्ये षष्ठी। सर्वेषां वस्तूनां महता भूतेन सम्बन्धस्त्वस्त्येव। तस्य व्यापकत्वात्तेषां च व्याप्यत्वात्। देवदत्तस्य गृहमित्युक्ते न हि देवदत्ताद्गृहं गृहोपकरणं वा जातमिति प्रतीयते। देवदत्तस्वामिकं गृहमित्येव साधीयसो प्रतीतिः। एवमत्रापि विज्ञेयम्॥ ११॥

स यथा सर्वासामपां समुद्र एकायनमेवं सर्वेषां स्पर्शानां त्वगेकायनम्। एवं सर्वेषां गन्धानां नासिके एकायनम्। एवं सर्वेषां रसानां जिह्वैकायनम्। एवं सर्वेषां रूपाणां चक्षुरेकायनम्। एवं सर्वेषां शब्दानां श्रोत्रमेकायनम्। एवं सर्वेषां संकल्पानां मन एकायनम्। एवं सर्वासां विद्यानां हृदयमेकायनम्। एवं सर्वेषां कर्मणां हस्तावेकायनम्। एवं सर्वेषामानन्दानामुपस्थ एकायनम्। एवं सर्वेषां विसर्गाणां पायुरेकायनम्। एवं सर्वेषामध्वनां पादावेकायनम्। एवं सर्वेषां वेदानां वागेकायनम्॥ १२॥

सर्वासामपां समुद्र एकायनमिति तु सत्यम्। परं स्पर्शानां त्वगेकायनं गन्धानां नासिके एकायनमित्यादि तु न सत्यम्। स्पर्शानामयनं न त्वक् बाह्याः पदार्था एव। एवं गन्धानामित्यादावपि ज्ञेयम्। एवं च सर्वमशुद्धम्। अथवा नायनं भावे ल्युट्। करणे ल्युट्। इयते गम्यतेनूभूयतेनेनेत्ययनम्। एवं च स्पर्शानामयनमनुभवसाधनं त्वगिति तथ्यमेव। गन्धानामित्यस्य गन्धानां ग्रहणस्य साधनं नासिके इति सत्यमेव। सर्वेषामानन्दानामयनमुपस्थमेवेति ब्राह्मणवचनम्। ब्राह्मणानि बहुवादीनि भवन्ति। तेषां दृशि केवलमुपस्थएवानन्दविधानम्। एवं विसर्गाणां पायुरेकायनमिति मुख्यतामाश्रित्य कथनम्। नेत्राभ्यामपि किट्टं निस्सरति तस्यायनं न पायुर्नेत्रद्वयमेव। नासिकातोपि मलं निस्सरति तस्य स्थानं नासिकाच्छिद्रे एव नो पायुः। सर्वेषां वेदानां वागेकायनमित्युक्त्यावगम्यते यज्ञकाले जिह्वया वेदानामुच्चार्यमाणत्वात्तथा कथनम्। अन्यथा सर्वासां विद्यानां हृदयमेकायनमिति निरूपणेन वेदानामप्ययनंनिरूपणं जातमेव। सर्वेषामध्वनां पादावेकायनमिति तद्युगीनावलोकनम्। अद्यत्वे तु खञ्जानामपि वायुयानादिभिर्गमनमवलोक्यत एवेति। सर्वमिदं ब्राह्मणम्॥ १२॥

स यथा सैन्धवघनोनन्तरोबाह्यः कृत्स्नो रसघन एवैवं वा अरेयमात्मानन्तरोबाह्यः कृत्स्नः प्रज्ञानघन एव। एतेभ्यो भूतेभ्यः समुत्थाय तान्येवानु विनश्यति। न प्रेत्य संज्ञास्तीत्यरे ब्रवीमिति होवाच याज्ञवल्क्यः॥ १३॥

अत्र तत्त्वमुपदिशति। सैन्धवघन इत्यत्र कूटपर्यायो घनशब्दः। यथा सैन्धवकूटे सैन्धवं नानन्तरं भवति नाबाह्यं भवति। निखिल एव कूटः सैन्धवमयः। अतएव कृत्स्नो रसघनः। लवणरसघन इत्यर्थः। एवमयमात्माप्यनन्तरो नास्ति कश्चिद्भागोन्तरो न वा कश्चिद्भागो बाह्यः। अन्तरतोपि बाह्यतोपि सर्वतोपि स आत्मैव। कृत्स्नः प्रज्ञानघनः प्रज्ञानकूट एव सः। अन्नकूटे यथा अन्नमेव भवति, ओदनकूटे यथौदन एव भवति एवं प्रज्ञानकूटे प्रज्ञानादृते नान्यस्य कस्यचिदवकाशः। शरीर आत्मांशः प्रज्ञानघन एव। कुतस्तस्योत्पत्तिरित्याह—एतेभ्यो भूतेभ्यः पृथिव्यादिभ्यः। अपादाने पञ्चमी। समुत्थाय समुत्पद्य तान्येव भूतान्येव

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अनु विनश्यति। विनष्टेपु भूतेषु विनश्यत्सु वा भूतेषु स आत्मापि विनश्यत्येव। प्रेत्य विनशनानन्तरं न तस्य संज्ञा चिह्नमस्तीति ब्रवीमीत्युवाच याज्ञवल्क्यः ।।१३।।

सा होवाच मैत्रेयी। अत्रैव मा भगवान् मोहान्तमापीपत् (–मापीपियात्)।

शरीरान्त एवात्मान्त इति श्रुत्वा व्याकुलमना मैत्रेय्युवाच—अत्रैव आत्मस्वरूपाववोधनावसर एव भगवान् भवान् मा मां मोहान्तं मोहसमीपम् आपीपत्प्रापितवान्। महानत्र मोहः। श्रूयते श्रुतं च पूर्वं भवन्त एवविनाशी स आत्मेति। इदानीं भवन्त एव श्रूयते न प्रेत्य संज्ञास्तीति। अतश्चाहं मोहं प्रापितास्मि ।।

न वा अहमिमं विजानामीति।

अहं मैत्रेयीममात्मानं न विजानामि विनश्यत्स्वरूपमितिशेषः अहं तु जानामि स आत्माविनाशीति। अतएव भवत्कथनेनाहं मोहं गतास्मि।

स होवाच न वा अरेहं मोहं ब्रवीमि।

स याज्ञवल्क्य उवाच अरे प्रिये मैत्रेयि मोहमहं ब्रवीमीति न। नाहं तथा ब्रवीमि। कस्यचिदन्यस्य मतं मया श्रावितम्। नेदं मामकं मतमिति। तर्हि भवानात्मविषये किं ब्रवीतीत्याह—

अविनाशी वा अरेयमात्मानुच्छित्तिधर्मा ।।१४।।

अयमात्मानुच्छित्तिधर्मा। उच्छित्तिरुच्छेदः। छिदिर् द्वैधीकरणे। द्वैधीकरणं विनाशः। आत्मानुच्छित्तिधर्मा। उच्छित्तिर्विनाशो धर्मो यस्य स उच्छित्तिधर्मा। यस्तथा न भवति सोनुच्छित्तिधर्मा। धर्मोत्र स्वरूपम्। आत्मानुच्छित्तिस्वरूप इत्यर्थः। अथवेत्थं संगति निर्वाह्या—स उवाच न वेति। यदहं पूर्वमुक्तवान् न प्रेत्य संज्ञास्तीति तत्तु मोहं मोहात् वैचित्याद् ब्रवीमि उक्तवान्। सत्यं त्विदमेव अविनाशीत्यादि। यद्वा तद्वा स्यादिदं तु सत्यमेव यत् तदानीपपि उपनिषत्कालेपि आत्मानित्यत्ववादः प्रवर्तमान आसीदेवेति ।। १४ ।।

यत्र हि द्वैतमिव भवति तदितर इतरं पश्यति, तदितर इतरं जिघ्रति, तदितर इतरं रसयते, तदितर इतरमभिवदति, तदितर इतरं शृणोति, तदितर इतरं मनुते, तदितर इतरं स्पृशति, तदितर इतरं विजानाति। यत्र त्वस्य सर्वमात्मैवाभूत् तत्केन कं पश्येत्, तत्केन कं जिघ्रेत्, तत्केन कमभिवदेत्, तत्केन कं शृणुयात्, तत्केन कं स्पृशेत्, तत्केन कं विजानीयात्। येनेदं सर्वं विजानाति तं केन कं विजानीयात्। स नेति नेतीत्यात्मागृह्यो न हि गृह्यते, अशीर्यो न हि शीर्यते, असङ्गो न हि सज्यते, असितो न व्यथते, न रिष्यति। विज्ञातारमरे केन विजानीयात्। इत्युक्तानुशासनानि मैत्रेयि। एतावदरं खल्वमृतत्वम्। इति होक्त्वा याज्ञवल्क्यो विजहार ।। १५ ।।

मैत्रेय्या पृष्टमासीद्यदेव भगवान्वेद तदेव मे ब्रूहीति। आत्मज्ञानानुकूलमात्मा तेन विवृतः। आत्मज्ञानफलमपि तथैव विवृतम्। आत्मा सर्वथाविज्ञेय इत्युक्तमत्र। विस्पष्टया वाचा स्वज्ञानं तस्यां संक्रमय्य याज्ञवल्क्यो विजहार विहारं कृतवान्। प्रव्रज्यां स्वीकृत्य ततो गतवान् ।। १५ ।।

इति श्रीबृहदारण्यकोपनिषदि चतुर्थाध्याये पञ्चमे ब्राह्मणे

श्रीकाशीपण्डितसभया "पण्डितराजे" त्युपाधिविभूषितेन
परमहंसपरिव्राजकाचार्य-स्वामिश्रीभगवदाचार्येण
प्रणीतं
बृहदारण्यकोपनिषत्संस्कारभाष्यम्

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri